
B.I/(A)

इती

श्रीमद्भगवत Shrimad-Bhagavatham

श्रीधर कृत भावार्थ दीपिक व्याख्यन सहित

॥ संपूर्ण ॥



S 67

श्रीराधाकृष्णोविजयतेतराम् ॥ जयंतिश्रीपरानंदकृपापांगलसद्दृशः ॥ यानित्यमनुवर्त्तंतेसंपदोविगताऽदृशः ॥
उक्तंत्रयोदशाऽध्यायैर्द्वादशेत्वाश्रयःसतः ॥ अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरःस्वतः उक्तोलयावधित्वेनप्राक्
तात्यंतिकेलये ॥ अधिष्ठानतयाचोक्तोमहापुरुषवर्णने ॥ तत्रादौषड्भिरध्यायैःशुकःप्राहपरीक्षिते ॥ शेषैस्तत्राखिलान्या
हृस्ततःप्रदेश्यसत्रिभि ॥ स्वाश्रयश्रवणोत्कण्ठ्यान्नविलंबोमनीषिणां ॥ इत्येष्यत्कालवंश्यंचचतुर्भिस्तावदुच्यते त
त्रतुप्रथमेभाविमागधान्वयभूमिपान् ॥ कलिप्रभावतःप्राहसंकरादिमलीमसान् ॥ एवंभूतेसोमवंशेमुकुन्द

श्रीशुकउवाच ॥ योऽन्त्यःपुरंजयोनामभविष्योबारहद्रथः ॥ तस्यामात्यस्तुशु
नकोहत्वास्वामिनमात्मजं ॥ प्रद्योतसंज्ञंराजानंकर्त्तायत्पालकःसुतः ॥ १ ॥

स्वरक्रीडावर्णिताथासएववंशोभावीवरायतेकृष्णभक्तिमुक्तामुक्तैवबर्त्मना ॥ स्वीतिवक्तुम् ॥ तदेववैवस्वतमनुवंशे
सोमवंशप्रस्तावेनश्रीकृष्णावतारचरितानिसप्रपंचमनुवर्णितानि ॥ अथेदानींभावीसोमवंशःकलौविजातीयसं
करादिमलीमसोवैराग्यद्वाराश्रीकृष्णैकभक्तिनिगमनायाऽनुवर्ण्यते ॥ तत्रतुरामवंशशाखासुचिरकालानुवर्त्ति
तयामागधवंशोऽनुक्रम्यते ॥ तत्रपूरोर्वंशेउपरिचरोवसुस्तस्यबृहद्रथः ॥ तस्यजरासंधः तस्यसहदेवः ॥ पुत्रोऽभूदित्यु
क्तंनवमस्कंधे ॥ तत्रैवसहदेवान्मार्जारिः ततःश्रुतश्रवाइत्यदयोरिपुंजयान्ताः विंशतिर्भाविनोराजानोनिरूपिताः
तदुपरितनंवंशंसंकरादिदोषैःप्रपंचयति ॥ योऽन्त्यइतिरिपुंजयएवपुरंजयः ॥ स्वामिनंपुरंजयंहत्वास्वपुत्रंप्रद्योतं

॥भा॰ द्वा॰॥

॥२॥

नवनन्दान्नन्दं च तत्पुत्रांश्चेत्येवं नव ॥ प्रपन्नान्विश्वस्तान्विख्यातान्स्वाद्विजः ॥ कौटिल्यवात्स्यायनादिपर्य्याय
श्चाणाक्य उद्धरिष्यति उन्मूलयिष्यति ॥ मौर्य्याः मौर्यसंज्ञाः ॥ १० ॥ कथं भोक्ष्यन्ति तदाह स एवेति ॥ चंद्रगुप्तं मौर्यं प्रथमं
म् ॥ ११ ॥ १२ ॥ १३ ॥ तेषां प्रथमो दशरथः ॥ पराशरादिभिरुक्तोऽप्यनुसंधेयः ॥ तेन सह मौर्य्या दश ॥ सप्तत्रिंशच्छतोत्तरं सप्त

नवनंदान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ ॥
स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ ११ ॥ तत्सुतो वारिसारस्तु ततश्चाशोकवर्द्धनः ॥ सुयशा
भविता तस्य संगतः सुयशःसुतः ॥ १२ ॥ शालिशूकस्ततस्तस्य सोमशर्म्मा भविष्यति ॥ शतधन्वा
ततस्तस्य भविता तद्बृहद्रथः ॥ १३ ॥ मौर्य्यास्त्वेते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ समा भोक्ष्यन्ति
पृथिवीं कलौ कुरुकुलोद्वह ॥ १४ ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः ॥ वसुमित्रो भद्रक
श्च पुलिंदो भविता सुतः ॥ १५ ॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ ततो भागवतस्तस्मा
द्देवभूतिः कुरूद्वह ॥ १६ ॥ शुंगा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ॥ १७ ॥ ततः काण्वानियं भू

त्रिंशदुत्तरं शतं समाः ॥ १४ ॥ १५ ॥ १६ ॥ बृहद्रथस्य सेनापतिः ॥ पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति ॥ स च शुंगानां
प्रथमः ॥ ततोऽग्निमित्रादयो नवेत्येवं शुंगा दश वर्षशताधिकं द्वादशाधिकं वर्षशतम् ॥ १७ ॥ + ॥ ० ॥ + +

प्रद्योतनाःप्रद्योतसंज्ञाः॥ २।३।४।५॥ नंदोनामकश्चिन्महापद्मसंख्यायाः॥ सेनायाधनस्यवापतिर्भविष्यति॥ ६।७ अतए

विशाखयूपस्तत्पुत्रोभविताराजकस्ततः॥ नन्दिवर्द्धनस्तत्पुत्रः पंचप्रद्योतनाइमे॥ अष्टत्रिं
शोत्तरशतं॥ १३८ भोक्ष्यंतिपृथिवींनृपाः॥ २ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः
क्षेमधर्मातस्यसुतःक्षेत्रज्ञःक्षेमधर्मजः॥ ३ ॥ विधिसारःसुतस्तस्याऽजातशत्रुर्भविष्यति द
र्भकस्तत्सुतोभावीदर्भकस्याजयःस्मृतः॥ नन्दिवर्द्धनआजेयोमहानंदिसुतस्ततः॥ ४ शि
शुनागादशैवैतेषष्ट्युत्तरशतत्रयम्॥ समाभोक्ष्यन्तिपृथिवींकुरुश्रेष्ठकलौनृपाः॥ ५ म
हानंदिसुतोराजन्शूद्रीगर्भोद्भवोबली॥ महापद्मपतिःकश्चिन्नन्दःक्षत्रविनासकृत॥ ६ त
तोनृपाभविष्यन्तिशूद्रप्रायास्त्वधार्मिकाः॥ ७ सएकच्छत्रांपृथिवीमनुल्लंघितशासनः
शासिष्यतिमहापद्मोद्वितीयइवभार्गवः॥ ८ ॥ तस्यचाष्टौभविष्यन्तिसुमाल्यप्रमु
खाःसुताः॥ यइमांभोक्ष्यन्तिमहींराजानःस्मशतंसमाः॥ ९ ॥

वमहापद्मइत्यपितस्यनाम॥ एकमेवछत्रंयस्यांतांपृथिवींशासिष्यतिपालयिष्यति॥ क्षत्रोत्सादनेदृष्टांतःभार्गवःप
रशुरामइव॥ ८ ॥ समाःसंवत्सरान्॥ ९ ॥

२७ आवभृत्या अवभृतिर्नगरी तद्राजानः ॥ २८।२९ एते आभीरादयो मौनव्यतिरिक्ताः पंचषष्टिर्नृपा एकोनशताधिकं वर्षस
हस्रं पृथिवीं भोक्ष्यन्ति ॥ ततः पूर्वोक्ता एवैकादश मौनास्त्रीण्यब्दशतानि क्षितिं भोक्ष्यन्ति ॥ तैः संस्थिते तेषु मौनेषु मृतेषु

एतेत्रिंशन्नृपतयश्चत्वार्य्यब्दशतानि च ॥ षट्पंचाशच्च पृथिवीं भोक्ष्यन्ति कुरुनंदन ॥२७॥
सप्ताभीरा आवभृत्या दशगर्द्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भविष्यंति चलोलुपाः ॥२८॥
ततोष्टौ यवना भाव्याश्चतुर्द्दश चतुष्कराः ॥ भूयो दश गुरुंडाश्च मौना एकादशैव तु ॥२९॥ ए
ते भोक्ष्यन्ति पृथिवीं दश वर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥ भो
क्ष्यन्त्यब्दशतान्यङ्ग त्रीणि तैः संस्थिते ततः ॥ किलकिलायां नृपतयो भूतनंदोथ वंगिरिः ॥
शिशुनन्दिश्च तद्भ्राता यशोदा नंदिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यंत्यधिकानि ष
ट् ॥ ३० ॥ तेषां त्रयोदश सुता भवितारश्च बाल्हिकाः ॥ पुष्यमित्रोथ राजन्यो दुर्मित्रोऽस्य तथै
व च ॥ ३१ ॥

किलकिलायां पुर्य्यां नृपतयो भविष्यन्ती त्युत्तरेणान्वयः ॥ अधिकानि च षड्वर्षाणि ॥ ३० ॥ तेषां भूतनन्दादीनां यथा
यथं बाल्हिका नामानस्त्रयोदश सुता भविष्यन्ति ॥ अथ पुष्यमित्रो नामान्यो राजन्यः ॥ अस्य च दुर्मित्रो नाम पुत्रः ३१

कथं कण्वान्वयस्याति तदाह शुंगमिति ॥ परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं क

शुंगं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ १८ ॥ त
स्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ १९ ॥ कण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ श
तानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥ २० ॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली
गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः ॥ २१ ॥ कृष्णनामाथ तद्भ्राता भविता पृथिवी
पतिः ॥ श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ २२ ॥ लंबोदरस्तु तत्पुत्रस्तस्माच्चिबि
लिको नृपः ॥ मेघस्वातिश्चिबिलिकादटमानस्तु तस्य च ॥ २३ ॥ अनिष्टकर्मा हालेयस्तलक
स्तस्य चात्मजः ॥ पुरीषभेरुस्तत्पुत्रस्ततो राजा सुनंदनः ॥ २४ ॥ चकोरो बहवो यत्र शिवस्वा
तिररिंदम ॥ तस्यापि गोमती पुत्रः पुरीमान् भविता ततः ॥ २५ ॥ मेदःशिराः शिवस्कंदो यज्ञश्री
स्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चन्द्रविज्ञः सलोमधिः ॥ २६ ॥

रिष्यति ॥ १८ । १९ ॥ कण्वानां चतुर्थः सुशर्मा इमे वसुदेवादयः ॥ कण्वायना वर्षाणां ह त्रीणि शतानि पंचचत्वारिंशद्वर्षा
णि च भूमिं भोक्ष्यन्ति ॥ २० ॥ कण्वानामन्तिमं सुशर्माणं हत्वा बलिनामा तद्भृत्यो गां भोक्ष्यति ॥ २१ । २४ ॥ यत्र येषु बहुसेतेषु

अष्टमनवमः शिवस्वातिनामा भविता ॥ २५ । २६ ॥

इमे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति॥ किंच॥ एते सर्वे अधर्मानृतपराः॥ अधर्मे अनृते च परायणाः स्थिताः॥ फल्गु
दाः॥ अल्पदातारः उदितास्तमितप्रायाः॥ हर्षशोकादिबहुलाः॥ असंस्कृता गर्भाधानादिसंस्काररहिताः॥ प्रजाः भक्षयिष्यं
ति॥ धनादपहारादिना पीडयिष्यन्ति॥ ३७॥ किंच॥ तन्नाथाः॥ ते नाथा येषां ते जनपदाः देशवर्त्तिनो मनुष्याः॥ तच्छीलाचा

तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः॥ एते धर्मानृतपराः फल्गुदास्तीव्रमन्यवः॥ स्त्री
बालगोद्विजघ्नाश्च परदारधनादृताः॥ उदितास्तमितप्राया अल्पसत्वाल्पकायुषः॥ असं
स्कृताः क्रियाहीना रजसा तमसावृताः॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः॥ ३७॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडि
ताः॥ ३८॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे रा
जवंशानुकीर्त्तनं प्रथमोऽध्यायः॥ १॥ श्रीशुक उवाच॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्ष
मा दया॥ कालेन बलिना राजन् नंक्ष्यत्यायुर्बलं स्मृतिः॥ १॥

रवादिनः॥ तेषामिव शीलमाचारो वादश्च येषां तद्वन्तः॥ ३८॥ इति श्रीमद्भागवते द्वादशे प्रथमः॥ १॥ द्वितीये तु कलेर्दोषवृ
द्धौ कल्क्यवतारतः॥ अधर्मिष्ठे जने नष्टे पुनः कृतयुगागमः॥ कलिधर्मान् प्रपञ्चयति॥ ततश्चेत्यादिना॥ १॥

तथा आंध्राः कोशलाः वैदूरपतयः ॥ निषधाश्च एते च तत्तद्देशनामभिः प्रख्यातास्तुल्यकालाः खंडमंडलेषु भूपाः ॥ तत एव
तेभ्यो बाल्हिकेभ्य एव भाव्या भविष्यन्ति ॥३१॥ ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता ॥ स च पूर्वोक्तात्पुरंज

एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः ॥ वैदूरपतयो भाव्या नैषधास्तत एव हि ॥३२॥ माग
धानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यति परो वर्णान् पुलिन्दयदुमद्रकान् ॥ प्रजाश्चा
ब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥३३॥ वीर्य्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अ
नुगंगमाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् ॥३४॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ॥
व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः ॥३५॥ सिन्धोस्तटं चंद्रभागां कौन्तीं काश्मीरमंड
लम् ॥ भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥३६॥

यात्परः पुरंजयादिति प्रसिद्धः स च वर्णान् ब्राह्मणादीन् पुलिन्दयदुमद्रसंज्ञान् ॥ म्लेच्छप्रायान् करिष्यति अपरानिति
पाठे ॥ अपरान् पुलिन्दादिसंज्ञान् वर्णान् करिष्यतीत्यर्थः स च एवं कृत्वा अब्रह्मभूयिष्ठा अत्रैवर्ण्यप्रचुराः सतीः प्रजाः स्था
पयिष्यति पालयिष्यति ॥३३॥ स च पद्मवत्यां पुरि अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यन्तं गुप्तां पालितां मेदिनीं भोक्ष्य
ति ॥ तदनंतरं च सौराष्ट्रादिदेशवर्त्तिनो द्विजाः व्रात्याः उपनयनरहिता भविष्यन्ति ॥३४॥ अब्रह्मवर्चसः वेदाचारशून्याः ॥३६॥

भा॰ द्वा॰ ५ आच्छिन्ना अपहृता दाराः द्रविणानि च यासां ताः॥ अष्टि बीजम्॥ ९।१०। ५॥ क्षीयमाणेष्वित्यादीनां इत्थं कलौ गतप्राय इति पं-
चमेनान्वयः क्षीयमाणेषु अल्पप्रायेषु॥ १॥ दस्युप्रायेषु चौरतुल्येषु॥ चौर्यानृतवृथाहिंसाद्या नानावृत्तयो येषां तेषु

॥५॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मिभिः॥ आच्छिन्नदारद्रविणा यास्यंति गिरिकाननम्॥ शाक-
मूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः॥ ९॥ अनावृष्ट्या विनंक्ष्यन्ति दुर्भिक्षकरपीडिताः॥ शीत-
वातातपप्रावृड्हिमैरन्योन्यतः प्रजाः॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतापेन च चिंतया॥ १०॥ त्रिंश-
द्विंशतिवर्षाणि परमायुः कलौ नृणाम्॥ ११॥ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः॥ वर्णाश्रम-
वतां धर्मे नष्टे वेदपथे नृणाम्॥ १२॥ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु॥ चौर्यानृतवृथाहिं-
सानानावृत्तिषु वै नृषु॥ १३॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु॥ गृहप्रायेष्वाश्रमेषु यौन-
प्रायेषु बंधुषु॥ १४॥ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु॥ विद्युत्प्रायेषु मेघेषु शून्य-
प्रायेषु सद्मसु॥ १५॥ इत्थं कलौ गतप्राये जनेषु खरधर्मिषु॥ धर्मत्राणाय सत्वेन भगवानवतरिष्यति॥ १६॥

॥ २॥ छागप्रायासु प्रमाणतः क्षीरतश्च अजातुल्यासु॥ ३॥ स्थास्नुषु वृक्षेषु॥ विद्युत्प्रायेषु तडिद्बहुलेषु॥ शून्यप्रायेषु
॥ धर्मादिरहितेषु सद्मसु गृहेषु॥ ४॥ जनेषु खरधर्मिषु दुःसहचेष्टितेषु॥ कलौ गतप्राये समाप्तप्राये॥ ६॥

धर्मन्याययोर्व्यवस्थायांबलमेव ॥२॥ दांपत्येभार्य्यापतिभावेरुचिरेवहेतुः ॥ नकुलगोत्रादिः व्यावहारिकेक्रयविक्रयादौ
स्त्रीत्वेपुंस्त्वेचतयोःश्रेष्ठेरतिः ॥ कौशलमेवहेतुर्नकुलमाचारोवा ॥ आश्रमाणांख्यातौज्ञानेलिंगमेवदंडाजिनादिकंहे
तुर्नत्वाचारविशेषः ॥ अन्योन्यापत्तिकारणंच आश्रमादाश्रमान्तरप्राप्तौचकारणम् ॥ यद्वा ॥ वहूदकहंसादीनामन्योन्या

वित्तमेवकलौनृणांजन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायांकारणंवलमेवहि ॥२॥
दांपत्येऽभिरुचिर्हेतुर्मायैवव्यावहारिके ॥ स्त्रीत्वेपुंस्त्वेचहिरतिर्विप्रत्वेसूत्रमेवहि ॥ लिंग
मेवासमाख्यातावन्योन्यापत्तिकारणम् ॥ अवृत्त्यान्यायदौर्वल्यंपांडित्येचापलंवचः ॥ अ
नाढ्यतैवासाधुत्वेसाधुत्वेदंभएवतु ॥ स्वीकारएवचोद्वाहेस्नानमेवप्रसाधनम् ॥३॥ दूरेवा
र्यपनंतीर्थंलावण्यंकेशधारणम् ॥ उदरंभरितास्वार्थःसत्यत्वेधार्ष्ट्यमेवहि ॥ दाक्ष्यंकुटुम्ब
भरणंयशोर्थेधर्मसेवनम् ॥४॥ एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ॥ ब्रह्मविट्क्षत्रशू
द्राणांयोवलीभवितानृपः ॥५॥

पत्तौनमस्कारःव्यवहारेकारणं ॥ अवृत्त्यामुद्राप्रेणादावसामर्थ्येनन्यायदौर्वल्यंपराजयः ॥ चापलंवचःवहुभाषणम्
असाधुत्वेदोषख्यातावभियोगे ॥ प्रसाधनमलंकारः ॥३॥ दूरेवर्त्तमानंवार्ययनंजलाशयस्तीर्थंनतुगुर्वादि ॥ स्वार्थःपुरुषार्थः ॥४॥५॥

वासुदेवस्यांगरागेण चंदनादिनातिपुण्यगंधोनिलस्तंस्पृशंतोतितथातेषां ॥१३॥ स्थविष्ठः स्थूलनरः ॥१४॥ कृतयुगप्र
वृत्तिमाह यदावतीर्ण इति ॥ प्रजानां सूतिः प्रसूतिः ॥१५॥ तदवतारकालोपलक्षणमाह यदा चंद्रश्चेति ॥ तिष्यः पुष्यः
अयमर्थः ॥ चंद्रसूर्य्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः ॥ तदा तत्कृतयुगं भविष्यतीति ॥ यद्यपि च प्रतिद्वादशाब्दं

वासुदेवाङ्गरागातिपुण्यगन्धानिलस्पृशाम् ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥१३॥
तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्त्वमूर्त्तौ हृदि स्थिते ॥१४॥
यदावतीर्णो भगवान् कल्किधर्म्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सा
त्विकी ॥१५॥ यदा चंद्रश्च सूर्य्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यंति तदा भवति
तत्कृतम् ॥१६॥ येऽतीता वर्त्तमानाः ये भविष्यंति च पार्थिवाः ॥ ते त उद्देशतः प्रोक्ता वं
शज्ञाः सोमसूर्य्ययोः ॥१७॥

कराशौ बृहस्पतौ वर्त्तमाने द्वित्रास्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति ॥ तथापि तेषां सह प्रवेशो
ऽत्र विवक्षितः ॥ समेष्यंतीति वचनात् ॥ अतो नातिप्रसंगः ॥१६॥ एवं नवमस्कंधमारभ्यानुक्रांतं वैवस्वतमनो
र्वंशद्वयं निगमयति ॥ येऽतीता इति ॥ उद्देशतः संक्षेपतः ॥१७॥ ॥ ० ॥ ० ॥ + ॥ ऽऽ ॥ ऽऽ ॥ +

एतत्प्रपंचयति चतुर्भिः ॥ चराचरगुरोरीश्वरस्येति धर्मत्राणे हेतुः ॥ गुरुत्वेश्वरत्वयोरुपपादनम् अखिलस्य विश्वस्यात्म
नः कारणस्येति एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय ॥ धर्मत्राणप्रयोजनमाह ॥ कर्मापनुत्तये मोक्षाय १७ शं
भलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे ॥१८॥ धर्मत्राणप्रकारमाह ॥ अश्वमिति असाधवो

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये ॥१७॥
शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्य
ति ॥१८॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पति ॥ असिनासाधुदमनमष्टैश्वर्यगुणा
न्वितः ॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदो दस्यून् कोटिशो
निहनिष्यति ॥२०॥ अथ तेषां भविष्यन्ति मनांसि विशदानि वै ॥ ३३ ॥ १ ॥ + ॥

दस्यवो येन तमस्य मारुह्यासिना दस्यून् कोटिशो निहनिष्यतीत्युत्तरेणान्वयः ॥ असाधुदमन इति पाठे कल्किविशेषणम्
तत्प्रपंचः ॥ आशुना शीघ्रगामिना तेन हयेन क्षोण्यां विचरन् ॥ अणिमाद्यष्टैश्वर्याणि गुणाश्च सत्यसंकल्पादयस्तैरन्वि
तः ॥ नृपलिंगच्छदः राजवेषच्छन्नान् २०॥ ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह ॥ अथेति सार्द्धद्वाभ्याम् ॥ तेषां पौर
जानपदानां मनांसि विशदानि भविष्यंति तत्र हेतुः ॥

यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्वात्मको देहादिर्वैकुंठं गतः॥ तदा कलियुगमविशत्॥ यत् यस्मिन्युगे जनः
पापे रमत इति कलियुगलक्षणम्॥ २१॥ ननु श्रीकृष्णे पृथिव्यां वर्तमानेऽपि संध्यारूपेण कलिः प्रविष्ट एवासीत्तत्स
त्यम्॥ तथापि तावत्तस्य पराक्रमो नाभवदित्याह यावदिति॥ पराक्रान्तुमभिभवितुम्॥ २२॥ अतो यथोक्त एव कलिप्र
वेशकाल इत्याह॥ यदा देवर्षय इति॥ द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यासंध्यांशाभ्यां सह द्वादशाब्दशता

विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः॥ तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः
॥२१॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः॥ तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशक
त्॥२२॥ यदा देवर्षयः सप्त मघासु विचरन्ति हि॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः॥२३॥
यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः॥ यदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥२४॥
यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः॥२५॥

त्मकः स कलिस्तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः॥ २३॥ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदेति॥ तदा प्रद्यो
तनात्प्रभृति वृद्धिं गच्छन्नंदात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः॥ २४॥ ननु यदा कलेर्लिङ्गमुपलभ्यन्ते तदैव प्रविष्ट इति युक्त
म्॥ ततः पूर्वमेव प्रवेशः॥ ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह॥ यस्मिन्निति॥ प्रतिपन्नं प्रविष्टमिति ज्ञातुं पुराविदः पूर्वे ज्ञातारः॥ २५॥

कलियुगावांतरविशेषं वक्तुमाह ॥ आरभ्येत्यादिना ॥ वर्षसहस्रं पंचदशोत्तरं शते चेति कयापि विवक्षया ऽवान्तरसंख्येयम् ॥ वस्तुत तस्तु परीक्षिन्नन्दयोरन्तरं द्वाभ्यामूनं वर्षाणां सार्द्धसहस्रं भवति ॥ यतः परीक्षित्समकालं मागधे मार्जारिमारभ्य रिपुंजयान्ता विंशती राजानः सहस्रं संवत्सरं भोक्ष्यन्तीत्युक्तं नवमस्कंधे ॥ ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरमिति ततः परं च प्रद्योतना ॥ अष्टात्रिंशच्छतम् ॥ शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रैवोक्तत्वात् ॥ १५ ॥ कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह सप्तर्षीणां त्विति ॥ अयमर्थः ॥ प्रागग्रशकटाकारं ताराः सप्तकं सप्तर्षिमंडलम् तत्राकिंचदुत्तभेवाय

आरभ्य भवतो जन्म यावन्नन्दाऽभिषेचनम् ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरम् ॥ १८ ॥
सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ ते
नैत ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥ १९ ॥ ते त्वदीये द्विजाः काल अधुना चाश्रिता मघाम् ॥ २० ॥

स्थानीयो मरीचिः ॥ ततः पश्चाद्वानम्रयुगकन्ध एकारो विशिष्टः सभार्य्यः ॥ ततः पश्चादीषदुन्नते पस्थानीयोऽङ्गिराः ॥ ततः पश्चाच्चतुरस्राताराः ॥ चतुष्कोणैशान्यामत्रिः ॥ ततो दक्षिणातः पुलस्त्यः ॥ पुलस्त्यात्पश्चिमतः पुलहः ततउत्तरतः क्रतुः एवंस्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ दृश्येते पुलहक्रतुसंज्ञौ ॥ तयोस्तु मध्ये तयोः पूर्वयोः समध्ये यत्समं दाक्षिणातः समदेशावस्थितमाश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते तेन तथैव युक्ता नृणामब्दशतं तिष्ठन्ति ॥ १९ ॥
ते च द्विजास्त्वदीये काले ऽधुना मघामाश्रिता वर्त्तन्ते ॥ २० ॥

एते वो नाम लिंगानामित्यादि यदुक्तं तत्प्रपंचयति ॥ राजन्निति पंचभिः ॥३२॥ ममत्वं कृत्वेत्यनेन सूचितां भूतद्रोहप्रवृ
त्तिं निंदति ॥ कृमीति राजा नाम्नः ॥ राजेति नाम यस्य तस्यापि देहस्यान्ते कृमयो विष्ठा भस्मेति वा संज्ञा भविष्यन्ति न
कृते तदर्थं यो भूतधुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ॥ कुत इत्यपेक्षायां हेतुत्वेन भूतद्रोहं विशिनष्टि यतो भूतद्रोहा

राजन्नेते मया प्रोक्ता नरदेवास्तथापरे ॥ भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ॥३२॥ कृ
मिविड्भस्मसंज्ञान्ते राजनाम्नोपि यस्य च ॥ भूतधुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥३३॥
कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥३४॥ ते
जोवन्नमयं कायं गृहीत्वात्मतया बुधाः ॥ महीं ममतया चोभौ हित्वान्तेऽदर्शनं गताः ॥३५॥
ये ये भूपतयो राजन्भुंजंति भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥३६॥ इ
ति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे कलिधर्मो नाम द्वितीयोऽध्यायः ॥२॥

न्निरयो भवतीति ॥३३॥ ममत्वप्रकारं प्रपंचयति कथमिति ॥ सेयमखंडा भूमिः मे पूर्वजैः ॥ पुरुषैर्धृता सती इदानीं च मत्पू
र्वा च सती मत्पुत्रादेः कथं स्यादित्येवं ॥३४॥ उभौ महीं कायं च ॥ अदर्शनं मृत्युं ॥३५॥ उपसंहरति ॥ ये य इति ॥ ते सर्वे च कथासु क्रिय
माणासु कथामात्राः कालेन कृताः ॥३६॥ इति द्वादशे द्वितीयोऽध्यायः ॥२॥

कलेरनंतरंकृतयुगप्रवेशमाह॥ दिव्याब्दानामिति॥ चतुर्थेकलौप्रवेशेनाब्दपरमितेनांशेनापिसहातीतेसतीत्यर्थः॥ कृ
तयुगप्रवेशचिन्हमाह॥ यदानृणांमनः आत्मप्रकाशकंभविष्यति॥ तदेति॥ २६॥ राजवंशोक्तांस्थितिं॥ ब्राह्मणादिवंश
स्थापतिदिशति॥ इत्येवइति॥ यथायाभिरुच्चनीचावस्थाभिः तास्ता अवस्थावंशाइतिवापाठः॥ २७॥ एतत्कीर्त्तनस्यैवेर

दिव्याब्दानांसहस्रांतेचतुर्थेतुपुनःकृतम्॥ भविष्यतितदानृणांमनआत्मप्रकाशकम्॥ २६॥
इत्येषमानवोवंशोयथासंख्यायतेभुवि॥ तथाविट्शूद्रविप्राणांतास्ताज्ञेयायुगेयुगे॥ २७॥ एते
षांनामलिंगानांपुरुषाणांमहात्मनाम्॥ कथामात्रावशिष्टानांकीर्त्तिरेवस्थिताभुवि॥ २८॥
देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंशजः॥ कलापग्रामआसातेमहायोगबलान्वितौ॥ २९॥
ताविहेत्यकलेरंतेवासुदेवानुशिक्षितौ॥ वर्णाश्रमयुतंधर्म्मंपूर्ववत्प्रथयिष्यतः॥ ३०॥ कृ
तंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम्॥ अनेनक्रमयोगेनभुविप्राणिषुवर्त्तते॥ ३१॥॥

स्योपयोगितामाह॥ एतेषामिति॥ नामैवलिंगंज्ञापकंयेषांतेषां॥ कथामात्रेणैवावशिष्टानांकीर्त्तिरेवस्थितान
तुराज्यंपुत्रादयोवा॥ २८॥ कलावुत्सन्नानांराजवंशादीनांपुनःप्रवृत्तिप्रकारमाह॥ देवापिःसोमवंशजःमरुस्तुसू
र्यवंशजः॥ कलापग्रामोनामयोगिनामावासःप्रसिद्धः॥ २९॥ ३०॥ इममेवप्रकारंप्रतिचतुर्युगंदर्शयति॥ कृतमिति॥ ३१॥

 अन्तकेनपश्यन्तीत्युक्तंतदेवाह॥यामिति॥ऊरूद्वहेतिभूमिगीतंकथयन्शुकः॥संबोधयतिकुलोद्वहाइतितुपाठःसुग

यांविसृज्यैवमनवस्तत्सुताश्चकुरूद्वह॥गतायथागतंयुद्धेतांमांजेष्यन्त्यबुद्धयः॥६॥मत्कृते
पितृपुत्राणांभ्रातृणांचापिविग्रहः॥जायतेह्यसतांराज्येममताबद्धचेतसाम्॥७॥ममैवे
यंमहीकृत्स्नानतेमूढेतिवादिनः॥स्पर्द्धमानामिथोघ्नन्तिम्रियन्तेमत्कृतेनृपाः॥पृथुःपु
रूरवागाधिर्नहुषोभरतोऽर्जुनः॥मांधातासगरोरामःखट्वांगोधुन्धुहारघुः॥तृणविन्दु
र्ययातिश्चशर्यातिःशंतनुर्गयः॥भगीरथःकुवलयाश्वःककुत्स्थोनैषधोनृगः॥हिरण्य
कशिपुर्वृत्रोरावणोलोकरावणः॥नमुचिःशंवरोभौमोहिरण्याक्षोऽथतारकः॥अन्येच
बहवोदैत्याराजानोयेमहेश्वराः॥सर्वेसर्वविदःशूराःसर्वेसर्वजितोऽजिताः॥ममतांम
य्यवर्त्तन्तकृत्वोच्चैर्मर्त्यधर्मिणः॥कथावशेषाःकालेनह्यकृतार्थाःकृताविभो॥१३॥

मः॥६॥अबुद्धयइत्युक्तंतत्प्रपंचयतिमत्कृतइति॥७।८॥परमोनामकश्चिद्राजा॥यद्वा॥लोकदृष्ट्यादाशरथिरेवनिर्दि॥
ष्टः लोकंएवयतिरोदयतीतिलोकरावणः॥मयिउच्चैर्ममतांकृत्वायेऽवर्तन्ततेकालेनकथावशेषाःकृताः विभोइति

वंशेयंकुर्वन्कीर्तिन॥

तृतीये भूमिगीतैश्च राज्यदोषाद्विरज्यते॥ कलौ च दोषभूयिष्ठे दोषहन्त्री हरेर्नुतिः॥ देहे ऽहंतां भूमौ च ममतां कुर्वन्नृपतो ऽबुधा
द्धसत्युक्तम् तदेव भूमिगीतैः प्रपंचयति दृष्ट्वेत्यादिना॥ आत्मानि पृथिव्यां जये व्यग्रानुद्युक्तान्हासप्रकारमाह॥ अहो इति मा
माम्॥ १॥ येन कामेन फेनोपमे पिण्डे देहे विस्रंभिता विश्वासं नीता येषां नरेंद्राणां स एष कामो मोघ एव स्यात्॥ २॥ कामम

श्रीशुक उवाच॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियम्॥ अहो मा विजिगीषन्ति मृ
त्योः क्रीडनका नृपाः॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि॥ येन फेनोपमे पिण्डे ये ऽतिविस्रं
भिता नृपाः॥ २॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः॥ ततः सचिवपौराप्तकरीन्द्रानस्यक
ण्टकान्॥ ३॥ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम्॥ इत्याशाबद्धहृदया न पश्यन्त्यन्ति
केऽन्तकम्॥ ४॥ समुद्रावरणां जित्वा मां विशन्त्यब्धिमोजसा॥ कियदात्मजयस्यैतन्मुक्तिरात्मज

वद्दर्शयति द्वाभ्याम्॥ पूर्वमिति षडिन्द्रियार्थे लंटस्य न राज्यप्राप्तिः स्यादिति प्रथमं मामिन्द्रियषड्वर्गं निर्जित्य राजमंत्रिणो जेष्या
मो वशीकरिष्यामः॥ सचिव आमात्याः करीन्द्रा हस्तिपाः तांश्च जेष्यामः॥ कण्टकान् प्रतिपक्षान्॥ अस्य अपास्य॥ अथ कंट
कानिति पाठः॥ ३॥ एवं केचिदाशाबद्धहृदयाः॥ ४॥ एवं केचित्पुनर्मां जित्वा प्यतितरसया॥ अब्धिं विशंति॥ तदेव मिंद्रियजये
न येन राज्यं साधयितुमिच्छन्ति तेषां तिमन्दा इत्याह कियदिति॥ ५॥

तदानींतनजनानाह संतुष्टा इति मैत्राः भूतमैत्रीयुक्ताः॥ श्रमणा आत्माभ्यासवन्तः॥१५॥ अनृतेन सत्यम् हिंसया दया
असंतोषेण तपः॥ विग्रहेण दानमिति यथासंख्यं योज्यं॥१६॥ ब्रह्मोत्तराः ब्राह्मणाधिकाः॥१७॥ हिंसातुष्ट्यनृतद्वेषैरित्य

संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः॥१५॥
त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः॥१६॥ तदा
क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप॥१७॥ तपः
सत्यदयादानेष्वर्द्धं ह्रसति द्वापरे॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः॥१८॥ यशस्वि
नो महाशालाः स्वाध्यायाऽध्ययने रताः॥ आढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः॥
१९॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः॥ एधमानैः क्षीयमाणो ह्यन्ते सोऽपि वि
नंक्ष्यति॥२०॥ तस्मिन्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः॥ दुर्भगा भूरितर्षाश्च शूद्रदाशो
त्तराः प्रजाः॥२१॥

यं क्रमो न विवक्षितः॥ धर्मस्यार्द्धं ह्रसति क्षीयते॥ अधर्मस्य लक्षणैः चिह्नैः पादैरित्यर्थः॥१८॥ यशस्विनः कीर्ति
प्रियाः क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः॥१९॥ कलौ धर्मपादानां तुर्यांपादश्चतुर्थांऽशोऽवशिष्यते॥२०॥
शूद्रदाशोत्तराः शूद्रकैवर्तादिप्रधानाः॥२१॥

राजवंशानुकथनस्य तात्पर्यमाह कथा इमा इति ॥ विज्ञानं विषयासारता ज्ञानं ततो वैराग्यं तयोर्विवक्षया ॥ परेयुषां मृ
तानां वचोविभूतीर्वाग्विलासमात्ररूपाः ॥ पारमार्थ्यं परमार्थयुक्तं कथनं न भवतीत्यर्थः ॥ १० ॥ कस्तर्हि पुरुषार्थानामुपायः
परमार्थः ॥ तमाह यस्त्विति नित्यं प्रत्यहं तत्राप्यभीक्ष्णम् ॥ ११ ॥ कलिदोषोपचये सति भक्तेरसंभवं मन्यमानः पृच्छति ॥ के

कथा इमास्ते कथिता महीयसां वितायलोकेषु यशः परेयुषाम् ॥ विज्ञानवैराग्यविवक्षया वि
भो वचोविभूतीर्न तु पारमार्थ्यम् ॥ १० ॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंग
लघ्नः ॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ ११ ॥ राजोवाच ॥ केनोपायेन
भगवन्कलेर्दोषान्कलौ जनाः ॥ विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने ॥ १२ ॥ युगानि युगध
र्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥ १३ ॥ श्रीशुक उवाच ॥ कृ
ते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दानमिति पादा विभोर्नृप ॥ १४ ॥ ॥ १४ ॥

नोपायेनेति ॥ विधमिष्यन्ति नाशयिष्यन्ति यथा यथावत् ॥ १२ ॥ कलियुगे कः परमो धर्म इति बुभुत्सया पृच्छति युगा
नीति ॥ ब्रूहीत्यनुषंगः ॥ आत्यंतिकजिज्ञासया पुनः पृच्छति प्रलयकल्पयोः ॥ संहारस्थितिकालयोः ॥ न चायं बहिर्मुखः
प्रश्न इत्याह ॥ कालस्येति ॥ १३ ॥ तत्र युगधर्मांस्तावदाह कृत इति तज्जनैस्तत् ॥ कालीनैर्जनैः दानं अरागद्वेषतया अभ
यदानम् ॥ तदेव प्रथमस्कंधे शौचशब्देनोक्तं ॥ विभोः संपूर्णस्य धर्मस्य ॥ १४ ॥

अव्रता विहिताचारशून्याः ॥ अशौचाः शौचशून्या वटवो ब्रह्मचारिणो भविष्यन्ति ॥ कुटुंबिनश्च गृहस्थाः स्वयं भिक्षाटन
परा भविष्यन्ति न तु भिक्षां दास्यन्ति ॥ तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति न्यासिनो यतयः अतिलो
लुपा भविष्यंति ॥ २९ ॥ पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति ॥ कटुकभाषिण्यः अप्रियवादिन्यः ॥ चौर्य्यं च माया
च कपटं उरु च साहसं यासां ताः ॥ ३० ॥ किंच ॥ किराता वणिजः ॥ पणायिष्यन्ति क्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यन्ति
किंच सर्वे जना अनापद्यपि जुगुप्सितां निंदितां वार्त्तां वृत्तिं साधु मंस्यन्ते ॥ ३१ ॥ सर्वोत्तममपि पतिं द्रव्यहीनं भर्त्याः त्य
क्ष्यन्ति ॥ पतयश्च विपन्नं रोगादिभिर्व्यापाराक्षमं कौलं कुलपरंपरायातं त्यक्ष्यंति ॥ अपयस्विनीः दुग्धदोहाः ॥ ३२ ॥ सौ

अव्रता वटवोऽशौचा भिक्षवश्च कुटुंबिनः ॥ तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥ २९ ॥
ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः ॥ ३० ॥
पणायिष्यंति वै क्षुद्राः किराताः कूटकारिणः ॥ अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम् ॥ ३१ ॥
पतिं त्यक्ष्यंति निर्द्रव्यं भर्त्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३२ ॥
पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३३ ॥

रतं सुरतनिमित्तं सौहृदं येषां ते ॥ अत एव ननांदरोऽत्र भार्य्याभगिन्यः ॥ स्यालाः भार्य्याभ्रातरः तैः संवादो मंत्रालो
चनं येषां ते ननंदृ इति वा पाठः ॥ ३३ ॥

युगानामेवंभूतत्वेषम्येकारणमाह॥ सत्वमितिपंचभिः॥२२॥ मनश्चबुद्धिश्चेन्द्रियाणिचसत्वेयदाप्रभवन्ति अतिशयेनवर्त्तंते
॥२३॥ यदाकर्म्मादिषुभक्तिः प्रीतिस्तदारजोवृत्तिप्रधानंत्रेतायुगमितिजानीहि॥२४॥ काम्यानांकर्म्मणांविषयेयदाप्रीतिस्त

सत्वंरजस्तमइतिदृश्यंतेपुरुषेगुणाः॥ कालसंचोदितास्तेवैपरिवर्त्तन्त आत्मनि॥२२॥ प्रभवन्ति
यदासत्वेमनोबुद्धीन्द्रियाणिच॥ तदाकृतयुगंविद्याज्ज्ञानेतपसियद्रुचिः॥२३॥ यदाकर्मसु
काम्येषुभक्तिर्भवतिदेहिनाम्॥ तदात्रेतारजोवृत्तिरितिजानीहिबुद्धिमन्॥२४॥ यदालोभस्त्व
संतोषोमानोदंभोथमत्सरः॥ कर्मणांचापिकाम्यानांद्वापरंतद्रजस्तमः॥२५॥ यदामायाऽनृ
तंतंद्रानिद्राहिंसाविषादनम्॥ शोकोमोहोभयंदैन्यंसकलिस्तामसःस्मृतः॥२६॥ यस्मात्
क्षुद्रदृशोमर्त्याःक्षुद्रभाग्यामहाशनाः॥ कामिनोवित्तहीनाश्चस्वैरिण्यश्चस्त्रियोऽसतीः
॥२७॥ दस्यूत्कृष्टाजनपदावेदाःपाखंडदूषिताः॥ राजानश्चप्रजाभक्ष्याःशिश्नोदरपराद्विजाः॥२८॥

तदारजस्तमः प्रधानंद्वापरंजानीहि॥२५॥ विषादनंदुःखम्॥२६॥ कलिदोषान्प्रपंचयतियस्मादित्यादिना यस्मात्कले
र्हेतोः क्षुद्रदृशोमंदमतयः॥ अल्पभाग्याः महाशनावह्वाहाराः॥ वित्तहीना अपिकामिनः स्वैरिण्यः पुंश्चल्यः असतीः
असत्यः॥२७॥ दस्यव उत्कृष्टाः प्रचुरायेषुते॥२८॥

॥भा॰ द्वा॰॥

॥१२॥

तदेवंकलिदोषान्प्रपंच्यप्रस्तुतंतन्निस्तारोपायमाह॥ पुंसामितिषड्भिः॥ द्रव्यदेशात्मभिःसंभवोयेषांतान्॥ चित्तस्थःचि
त्तेस्फुरितः॥४०।४१॥ अयमेवोपायोनान्यइतिसदृष्टांतमाह॥ यथेति॥ धातुजंताम्रादिसंश्लेषजातंहेम्नोदुर्वर्णमालि

पुंसांकलिकृतान्दोषान्द्रव्यदेशात्मसंभवान्॥ सर्वान्हरतिचित्तस्थोभगवान्पुरुषोत्तमः
॥४०॥ श्रुतःसंकीर्त्तितोध्यातःपूजितस्त्वादृतोपिवा॥ नृणांधुनोतिभगवान्हृत्स्थोजन्मायुता
शुभम्॥४१॥ यथाहेम्निस्थितोवन्हिर्दुर्वर्णंहंतिधातुजम्॥ एवमात्मगतोविष्णुर्योगिनामशुभा
शयम्॥४२॥ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः॥ नात्यंतशुद्धिंलभतेंतरा
त्मायथाहृदिस्थेभगवत्यनंते॥४३॥ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवम्॥ म्रियमाणो
ह्यवहितस्ततोयातिपरांगतिम्॥४४॥ म्रियमाणैरभिध्येयोभगवान्परमेश्वरः॥ आत्मभावंनय
त्यंगसर्वात्मासर्वसंश्रयः॥४५॥ कलिर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः॥ कीर्त्तनादेवकृष्णस्य

न्यंतत्रस्थितोवन्हिरेवहरतिनतुतोयादिएवंयोगिनामपिविष्णुरेव॥ नतुयोगादिकमित्यर्थः॥४२॥ एतदेवविवृणोतिवि
द्येतिविद्यादेवतोपासना॥४३।४४॥ आत्मभावंस्वस्वरूपम्॥४५॥ इदानींकलिंस्तौति द्वाभ्याम्॥ कलेर्दोषनिधेराजन्निति॥४६॥

पिशाचसंदर्शाः पिशाचसदृशाः ॥३५॥ काकिणीके विंशतिवराटिकामात्रेप्यर्थे विषयभूते विगृह्य वैरं कृत्वा ॥३६।३७॥ महां
तमनर्थमाहद्वाभ्यां कलाविति ॥ त्रिलोकनाथैरानतं नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति न पूजयिष्यंति ॥ पाषंडे

शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥३४॥
नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ वासोन्नपान
शयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यन्ति कलौ प्रजाः ॥३५॥ कलौ काकिणि
केप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यन्ति हि प्रियान्प्राणान्हनिष्यंति स्वकानपि ॥३६॥ न रक्षिष्यं
ति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ॥३७॥ कलौ न रा
जन्जगतां परं गुरुं त्रिलोकनाथानतपादपंकजम् ॥ प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पा
षंडविभिन्नचेतसः ॥३८॥ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान्
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ॥३९॥ ३३ ॥ ० ॥ + ॥

भिन्नमन्यथाकृतं चेतो येषां ते ॥३८॥ विवशो गृणन् ॥ विमुक्ताः कर्मरूपा अर्गलाः प्रतिबंधा यस्य सः ॥३९॥ ० ॥

नैमित्तिकत्वं दर्शयति ॥ यत्र यदा विश्वसृक् श्रीनारायणः ॥ विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते ॥ आत्मभूः ब्रह्मा च
तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मणएवानन्तासनत्वमुक्तम् ॥ ब्रह्मनिद्रां निमित्तीकृत्य प्रवर्त्तमानो लोकत्रयप्र
लयो नैमित्तिक इत्यर्थः ॥ प्राकृतिकं प्रलयमाह द्वाभ्याम् ॥ द्विपरार्द्धे तु ब्रह्मणआयुषि सप्त प्रकृतयः ॥ महदहंकारपंचत

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः
॥४॥ द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै ॥५॥ एष प्रा
कृतिको राजन् प्रलयो यत्र लीयते ॥ आंडकोशस्तु संघातो विघात उपसादिते ॥६॥ पर्जन्यः श
तवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः ॥ क्षयं यास्यंति
शनकैः कालेनोपद्रुताः प्रजाः ॥ सामुद्रं दैहिकं भौमं रसं सांवर्त्तको रविः ॥ रश्मिभिः पिबते घोरैः स
र्वं नैव विमुंचति ॥८॥

न्मात्राणि ॥४॥ संघातः महदादिकार्य्यभूतः ॥ प्रकृतीनां तत्कार्यब्रह्मांडस्य च लयात्प्राकृतिक इत्यर्थः ॥ विघाते विघातका
रणे उपसादिते सति ॥६॥ तदेवाह ॥ पर्जन्य इत्यादिना वृक्षौषध्यादिरूपेणोत्पन्नः ॥ प्राक्तनेन ग्रंथेन ॥७॥ सामुद्रादिकं सर्वं रसं र

तत्सर्वं हरिकीर्तनादेव कलौ भवति॥५१॥ इति द्वादशे तृतीयः॥३॥ चतुर्थे तु चतुर्धोक्ता लया नैमित्तिकादयः तत्र संसारनि
स्तारो हरिकीर्त्यैव वर्ण्यते॥ कलिदोषनिवर्तकं हरिनामसंकीर्तनादिकं सराव च कलौ परमो धर्म इति प्रश्नद्वयस्यो
त्तरमुक्तम्॥ पश्चादन्यत्त्वयं प्रलयकल्पयोर्मानं ब्रूहीति॥ तदिदानीं तृतीयस्कन्धोक्तकालानुवादपूर्वकं निरूपयति कालस्त
इति॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतामित्यादिना कालः कथितः॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् सं

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्॥५२॥ इति श्रीम
द्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे युगानुवर्णनं तृतीयोऽध्या
यः॥३॥ श्रीशुक उवाच॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप॥ कथितो युगमानं च शृणु कल्प
लयावपि॥१॥ चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते॥२॥
तदन्ते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता॥ त्रयो लोका इमे यत्र कल्पन्ते प्रलयाय हि॥३॥

ख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितम्॥१॥ तत्र कल्पमानमाह॥ चतुर्युगेति तत्र चतुर्दश म
नवः क्रमेण भवंति॥ प्रलयस्तु चतुर्विधः॥ नैमित्तिकः प्राकृतिक आत्यन्तिको नित्यश्चेति तत्र नैमित्तिकं प्रलयं मा
नसहितमाह॥ तदन्त इति द्वाभ्याम्॥ तावान् चतुर्युगसाहस्रप्रमाणः॥ सैव ब्राह्मी रात्रिः॥३॥ ॥ ॥ ॥ ॥

॥भा०द्वा०॥

॥२४॥

भूतादिस्तामसोऽहंकारः गुणैर्वृत्तिभिः सह॥१५॥अव्याकृतं प्रधानम्॥१६॥तस्यतुलयोनास्तीत्याह॥नतस्येति॥कालावयवैर्होरा
द्यादिभिः गुणाः भावविकाराः परिणामो विपरिणामः॥अव्यक्तमभिव्यक्तिविकारशून्यम्॥नित्यं सर्वदैकरूपं वृद्धिरहितमित्य
र्थः॥अव्ययं अपक्षयशून्यम् सर्वज्ञहेतुः कारणमिति॥१७॥किंच वागादिगोचरस्य सविशेषस्य विकारा भवन्ति॥इदंतुन

अपांरसमथोतेजस्तालीयन्तेऽथनीरसाः॥ग्रसतेतेजसोरूपंवायुस्तद्रहितंतदा॥लीयतेचा
निलेतेजोवायोःखंग्रसतेगुणम्॥सवैविशतिखंराजंस्ततश्चनभसोगुणम्॥शब्दंग्रसतिभू
तादिर्नभस्तमनुलीयते॥तैजसश्चेन्द्रियाण्यंगदेवान्वैकारिकोगुणैः॥१५॥महान्ग्रसत्यहंका
रंगुणाःसत्वादयश्चतम्॥ग्रसतेऽव्याकृतंराजन्गुणान्कालेनचोदितम्॥नतस्यकालावय
वैःपरिणामादयोगुणाः॥अनाद्यनन्तमव्यक्तंनित्यंकारणमव्ययम्॥नयत्रवाचोनमनोन
सत्वंतमोरजोवामहदादयोऽमी॥नप्राणबुद्धींद्रियदेवतावानसंनिवेशःखलुलोककल्पः
नस्वप्नजाग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलोऽग्निरर्कः॥संसुप्तवच्छून्यवदप्रतर्क्यंतन्मूल भूतंपदमामनंति॥

तथेत्याह नयत्रेतिद्वाभ्याम्॥लोककल्पःलोकरूपः॥संनिवेशो रचनाविशेषः॥स्वप्नजाग्रतस्वप्नजागरावस्थायुक्तम्॥
संसुप्तवत्॥इन्द्रियाद्यभावात्॥शून्यसादृश्ये हेतुः॥अप्रतर्क्यम्॥नपुनःशून्यमेवेत्याह॥तदिति॥१८॥ ॥ ० ॥ ३३॥

॥२४॥
२६

अनिलवेगोत्थः वायुवेगोद्भूतः अनिलवेगोवा ॥ इति पाठे अनिलेन वेगो यस्य स तथा ॥ रविरश्मिभिः ॥ पीतमुदकं च दह
तीत्यर्थः ॥ अनिलवेगोर्वीकृ इति तु पाठः सुगमः ॥ भुविवरान् पातालादीन् शून्यान् ॥ रविरश्मेर्देहि कुरसाकर्षणात् ॥ पा
रणैरहितान् ॥ दीशिखाभिर्ज्वालाभिः ९ ॥ किंचिदधिकं वर्षाणां शतं संवर्त्तकः परो वायुर्वाति ॥ तदा रजसावृतं खं धूम्रं

ततः संवर्त्तको वन्हिः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः शून्यान्भुविवरानथ ॥ ९ ॥ उप
र्य्यधः समन्ताच्च शिखाभिर्वन्हिसूर्य्ययोः ॥ दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत् ॥ १० ॥
ततः प्रचंडपवनो वर्षाणामधिकं शतं ॥ परः संवर्त्तको वाति धूम्रं खं रजसावृतम् ॥ ११ ॥ ततो
मेघकुलान्यंग चित्रवर्णान्यनेकशः ॥ शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः ॥ १२ ॥ तत
एकोदकं विश्वं ब्रह्मांडाविवरान्तरम् ॥ १३ ॥ तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे ॥ ग्र
स्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥ १४ ॥

भवति ॥ ११ ॥ रभसस्वनैः तीव्रगर्ज्जितैः ॥ १२ ॥ ब्रह्माण्डविवरान्तरं ब्रह्माण्डविवरमध्यगतं ॥ विश्वमेकोदकमेकार्णवोदक
व्याप्तं भवति ॥ १३ ॥ उदप्लवे उदकेनाप्लाविते सति ॥ प्रलयत्वाय अभावाय ॥ १४ ॥

यदातुबुद्धेरसत्वंतदातदवस्थानांसुतरामसत्वमित्याशयेनाहबुद्धेरिति॥ननुविश्वतैजसप्राज्ञानामेतावस्थानबुद्धेरित्य
शंक्याहमायामात्रमिति॥इदंविश्वतैजसप्राज्ञरूपम्॥२२॥आद्यन्तवत्वादित्यस्यहेतोरसिद्धिमाशंक्यसावयवत्वेनसाधय
तियथेतिअपवीति॥यत्सावयवंतदाद्यन्तवत्घटादिवदित्यर्थः॥अतउरयाप्ययात् आद्यन्तवत्वाद्विश्वंसन्नभवती
त्यर्थः॥यद्वापृथगेव॥आगमापायित्वाद्विश्वंमिथ्याब्रह्मतुतदवधित्वात्॥सत्यमित्यनेनसाध्यते॥दृष्टान्तस्तुपूर्वोक्तमे

बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिचोच्यते॥मायामात्रमिदंराजन्नानात्वंप्रत्यगात्मनि॥२२॥
यथजलधराव्योम्निभवंतिनभवंतिच॥ब्रह्मणीदंतथाविश्वमवयव्युदयाप्ययात्॥२३॥
सत्यंह्यवयवःप्रोक्तःसर्वावयविनामिह॥विनाऽर्थेनप्रतीयेरन्पटस्येवांगतन्तवः॥२४॥

व॥यथाजलधराव्योम्नीति॥दृष्टान्तत्वागमापायितदवधित्वमात्रे॥नतुमिथ्यात्वइति॥२३॥अन्यत्रमाहृतादितिप्रतिज्ञा
तंकारणस्यसत्यत्वमुपपादयति॥सत्यंहीति॥अवयवःकारणंप्रोक्तः॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य
मित्यादिश्रुतिभिःअत्रयुक्तिमपिदर्शयति॥विनेति॥अंगहेराजन् हियस्मात्॥अर्थेनअवयविनाविनापृथगेवअवय
वाःप्रतीयेरन्॥यथापटस्यावयवाःतंतवाःपटात्पृथक्प्रतीयंतेनहीति॥२४॥

उपसंहरति ॥ लयइति ॥ शक्तयः सत्वादयः ॥ २० ॥ आत्यंतिकलयमाह ॥ बुद्धींद्रियेति द्वादशभिः ॥ आत्यंतिकलयो मोक्षः ॥ स च ब्रह्म
ज्ञानेन सर्वप्रपंचलयात्मकः ॥ न च प्रपंचस्यात्मवत्सत्यत्वे लयः संभवतीति ज्ञानरूपात् ब्रह्मणः पृथक्भूतस्य तस्यास
त्वमुपपादयति ॥ बुद्धिश्च इंद्रियाणि च ॥ अर्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषामाश्रयं ज्ञानमेव भाति न पृथक् ॥ त
त्र हेतुमाह ॥ दृश्यत्वाव्यतिरेकाभ्यामिति अतो यदाद्यंतवत्तद्वस्तु ॥ अत्रैवं प्रयोगः ॥ विमतं सन्न भवति ॥ दृश्यत्वात्कारणा

लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयस्संप्रलीयंते विवशाः कालविद्रुताः
॥ २० ॥ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु य
त् ॥ २१ ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः खानि मात्राश्च न स्युरन्यतमाहृता
त् ॥ २२ ॥

व्यतिरेकात् आद्यंतवत्वाच्च रज्जुसर्पादिवदिति ॥ २१ ॥ तत्राव्यतिरेकं दृष्टांतेन प्रपंचयति ॥ दीपइति ॥ दीपचक्षूरूपाणां तेजो
विशेषाणां यथा तेजसो न व्यतिरेकः ॥ तथा धीः कर्म्मी खानि करणानि ॥ मात्रा विषयाः ते ततः ब्रह्मणः पृथक् न स्युर्ब्रह्मका
र्यत्वात् ॥ नन्वेवं कार्य्यकारणयोरभेदे कार्य्यासत्वे कारणस्याप्यसत्वं प्रसज्येत तत्राह अन्यतमादिति कार्यादन्यत्वान्न
व्यतिरिक्ताद्ब्रह्मणः प्रपंचाद्ब्रह्मणोऽस्ति व्यतिरेकः प्रपंचस्य तु ततो नास्ति व्यतिरेक इत्यर्थः ॥ २२ ॥ ऽऽ ॥ ० ॥ ऽऽ ॥

नकदाचिद
निदर्शंजगत

॥भा॰द्वा॰॥

॥२६॥

कुतइत्यतआहनहीति॥ननुसत्यस्याप्यात्मनोजीवब्रह्मरूपंनानात्वमस्त्येवतत्राहयद्यप्येवंनानात्वंमन्यतेतर्ह्यविद्वानक
थंतर्हितयोर्भेदव्यवहारःउपाधिकृतइत्याह॥नानात्वमिति॥तत्रछिद्रयोर्घटाकाशमहाकाशयोरिवेतिपरिच्छेदापरिच्छे
दृष्टान्तम्॥ज्योतिषोराकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारसदसद्भावे॥वातयोर्बाह्यशरीरस्थवायोरिवेति
क्रियाभेदे॥२७॥ब्रह्मणएवप्रपंचव्यवहारोलंवततंदृष्टान्तेनस्पष्टयतियथेति॥क्रियाभिस्तत्तद्रचनाभेदैः॥बहुधाकटकु
कुंडलरूपेण॥लौकिकवैदिकैर्वचोभिः॥जनैरहंकारोपहितैः॥२८॥नन्वहंकारस्यकथंब्रह्मस्वरूपावरणेनभेदव्यवहारहेतु
त्वम्तस्यस्वकारणभूतब्रह्मावरकत्वासंभवात्॥आवरणेवास्वस्यापिप्रकाशाभावादित्याशंक्यसदृष्टान्तमाह॥य

नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते॥नानात्वंछिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव
॥२७॥तथाहिरण्यंबहुधाप्रतीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु॥एवंवचोभिर्भगवानधो
क्षजोव्याख्यायतेलौकिकवैदिकैर्जनैः॥२८॥यथाघनोऽर्कप्रभवोऽर्कदर्शितोह्यर्कांशभूत
स्यचचक्षुषस्तमः॥एवंत्वहंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मनआत्मबंधनः॥२९॥

थेतिअर्करश्मयएवमेघरूपेणपरिणतावर्षन्ति॥अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते॥आदित्याज्जायतेवृष्टि
र्वृष्टेरन्नंततःप्रजाइत्यादिवचनात्॥तस्मादर्कप्रभवःअर्केणैवदर्शितःप्रकाशितश्चतमः॥स्वरूपभूतार्कदर्शनप्रतिबंध
कोभवति॥अहमहंकारः॥ब्रह्मगुणः॥ब्रह्मकार्य्यभूतः॥तदीक्षितस्तेनैवप्रकाशितश्चआत्मनोजीवस्यआत्मबंधनःब्र

॥२६॥

३१

ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत ॥ सत्यं ॥ तदपि नातीव सत्यमित्याह यदिति ॥ सामान्यं कारणं ॥ विशेषः का
र्यं तद्रूपेण ॥ अन्योन्याश्रयात्परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः ॥ अतः कारणत्वमवधित्वं व्यापकत्वमित्या
दिकमपि यत्परापेक्षत्वादाद्यंतवत् ॥ तत्सर्वमवास्त्वित्यर्थः ॥ यद्वा ॥ तत्रैव हेत्वंतरमेतत् ॥ यदुपलभ्येत संभ्रमः सामा
न्यविशेषरूपत्वात् स्वप्नवत् ॥ अन्योन्याश्रयादितीदमपि हेत्वंतरं ॥ गुणागुणी विशेष्यविशेषणव्याप्यव्यापकत्वा

यत्सामान्यविशेषाभ्यामुपलभ्येत संभ्रमः ॥ अन्योन्याऽऽश्रयात्सर्वमाद्यंतवदव
स्तु यत् ॥ २५ ॥ विकारः ख्यायमानोऽपि प्रत्यगात्मानमंतरा ॥ न निरूप्योऽस्त्यणुरपि ।
स्याच्चेच्चित्सम आत्मवत् ॥ २६ ॥

दिरूपेण परस्पराधीनसिद्धत्वात् ॥ तथाभूतं स्वप्नवदिति निगमनम् ॥ अतो यदाद्यंतवत् तत्सर्वमवस्त्विति ॥ २५ ॥ तदेव
मनेकैर्हेतुभिः प्रपंचस्यासत्वं प्रसाधितं ॥ तत्रशंकाननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत्सत्वं किं न स्यादिति तत्रा
ह विकार इति ख्यायमानः प्रकाशमानोऽपि विकारः प्रपंचः ॥ प्रत्यगात्मप्रकाशं विनाऽणुमात्रोऽपि न निरूप्योऽस्ति तं विना
निरूप्यः स्याच्चेत्तर्हि सोऽपि चित्समः स्याच्चिद्रूपेणात्मना समः ॥ स्वप्रकाशो भवेत् तथा च सति सोऽप्यात्मवत्स्यात्

भा॰ द्वा॰
॥१७॥

यदि प्रतिक्षणमवस्था भवंति तर्हि किं न दृश्यन्ते। अतो हेतुरसिद्ध इत्याशंक्याह। अनाद्यंतवता कालेन जायमाना अवस्था नैव लक्ष्यंते आकाशे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषा यथा नैव लक्ष्यंते तद्वत्। अतो यथा तेषां देशांतरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यंते तद्वदत्रापि वाल्यतारुण्यादिदर्शनेन मध्यवर्त्तिनोऽवस्थाः कल्प्यंत इति न हेतुरसिद्ध इत्यर्थः ३४ उपसंहरति नित्य इति ३५ पुराणार्थमुपसंहरति एता इति। लीलाविषयाः कथाः। अजो ब्रह्मापि कार्त्स्न्येनाभिधातुं न ईशः ३६ ननु यदि सा कार्त्स्न्येनाभिधातुं न शक्यंते तर्हि किं तदभिधानेन तत्राह

अनाद्यंतवतानेन कालेनेश्वरमूर्त्तिना। अवस्था नैव दृश्यंते वियति ज्योतिषामिव ३४
नित्यो नैमित्तकश्चैव तथा प्राकृतिको लयः। आत्यंतकश्च कथितः कालस्य गतिरीदृशी ३५
एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्वधाम्नः। लीलाकथास्ते कथिताः स
मासतः कार्त्स्न्येन नाजोप्यभिधातुमीशः ३६ संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्ना
न्यः प्लवो भगवतः पुरुषोत्तमस्य। लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःख दवार्दितस्य ३७

संसारेति विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्य अत उत्तितीर्षोः पुंसः। भगवतो या लीलास्तासां कथाः तासां रसस्तन्निषेवणमन्तरेणान्यः प्लव उत्तरणसाधनं न भवेत्। उपायांतरासंभवात्। तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ३७

अतएवाहंकारनाशेस्वरूपदर्शनं भवतीतितेनैवदृष्टान्तेनाह ॥ घनइति ॥ आत्मनउपाधिर्जिज्ञासयाविचारेण तर्हितद
अनुस्मरेत्ब्रह्माहमिति पश्यतीत्यर्थः ॥ ३० ॥ सोयमात्यंतिकः प्रलयइत्युपसंहरति ॥ यदैवमिति ॥ विवेकहेतिनाज्ञानश
स्त्रेण ॥ अहंकरणमेवात्मबन्धनं ॥ अच्युतं परिपूर्णमात्मानमनुभवतीत्यर्थः ॥ ३१ ॥ नित्यप्रलयमाह ॥ नित्यदेति ॥ ३२ ॥ कुतइ

घनोयदार्कप्रभवोविदीर्यते चक्षुःस्वरूपं रविमीक्षते तदा ॥ यदाह्यहंकारउपाधिरात्मनो जिज्ञा
सयानश्यतितर्ह्यनुस्मरेत ॥ ३० ॥ यदैवमेतेनविवेकहेतिना मायामयाहंकरणात्मबन्धनम्
छित्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यन्तिकमङ्गसंप्लवम् ॥ ३१ ॥ नित्यदासर्वभूता
नांब्रह्मादीनांपरंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाःसंप्रचक्षते ॥ ३२ ॥ कालस्रोतोजवे
नाशुह्रियमाणस्यनित्यदा ॥ परिणामिनामवस्थास्ताजन्मप्रलयहेतवः ॥ ३३ ॥ ० ॥

त्यत आह ॥ कालेति ॥ परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां याउच्चनीचावस्थाः ॥ ताः कालरूपस्रोतसोवेगेनाशुह्रिय
माणस्यदेहादेर्दृश्यमानास्तद्वदेवानित्यराजन्मप्रलयहेतवोभवंति ॥ देहः प्रतिक्षणं प्रध्वंसीअवस्थाभेदस्यविद्य

मानस्तार परिणामादिविवक्षितज्ञानमने ॥ ६ ॥

यथा देहः
त्वं पुनः कृतार्थ एवेत्यनुस्मारयति ॥ त्वं त्विति ॥ पशुबुद्धिमविवेकम् ॥ यस्मान्न नंक्ष्यसि कुत इत्यत आह ॥ न जात इति ॥ यथा देहः
प्रागभूतः सन्नद्य जातो नंक्ष्यति च ॥ न चैवं त्वं पूर्वं नाभूर्नवाद्य जातोऽसि ॥ अतो न नंक्ष्यसि ॥ २ ॥ ननु बीजांकुरवत्स्वस्मात्पुत्ररूपेण
स्वयमेव भवति ॥ यथाह श्रुतिः ॥ अंगादंगात्संभवसि हृदयादभिजायसे ॥ आत्मा वै पुत्र नामासि त्वं जीव शरदः शतमिति ॥ ततः
पुनरंकुराद्बीजमिव पौत्ररूपेणापि स्वयमेव भवति ॥ पिता पुत्रेण पितृमान्योनियोनाविति श्रुतेः ॥ अतस्तेषु नश्यत्सु कः

त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्यसि ॥ २ ॥ न भ
विष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ ३ ॥ स्वप्ने य
था शिरश्छेदं पंचत्वाद्यात्मनः स्वयम् ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥ ४ ॥

यं न नंक्ष्यामीति चेत्तत्राह न भविष्यसीति ॥ भूत्वा पुत्रपौत्रादिरूपवान् बीजांकुरवन्न भविष्यसि यस्माद्देहादेर्व्यतिरिक्तस्त्व
म् यथानलः काष्ठात् ॥ देहाद्देहो जायते नात्मेति भावः ॥ ३ ॥ जन्मादीनां देहधर्मत्वं दृष्टांतेन प्रपंचयति स्वप्ने यथात्मनः शि
रश्छेदं स्वयं पश्यति ॥ एवं जागरणेऽपि यस्माद्देहस्य पंचत्वादिकं पश्यति ॥ ततस्तद्द्रष्टात्मन इदं भ्रममात्रम् ॥ वस्तुतस्त्वात्मा
ऽजोऽमरश्चेत्यर्थः ॥ तदुक्तम् ॥ आत्मनः पितृपुत्राभ्यामनुमेयो भवाप्ययो ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः इत्यादि ॥ ४ ॥

श्रोतुरादरदार्ढ्यायसंप्रदायप्रवृत्तिमाह ॥ पुराणसंहितामितित्रिभिः ॥ सवैबादरायणः ॥ प्रीतःसन्मह्यमिमांसंहितांप्राहेतिपू
र्वेणान्वयः ॥ ३५ ॥ असौसूतइतिपुरतःस्थितमंगुल्यानिर्दिश्याह ॥ नैमिषालयेनैमिषारण्यस्थाने ॥ ३६ ॥ इतिश्रीद्वादशेचतुर्थे
४ पंचमेतुसमासेनपरब्रह्मोपदेशतः ॥ राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणम् ॥ एतत्पुराणंशृण्वन्नभयंप्राप्नोती ॥

पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ॥ नारदायपुराप्राहकृष्णद्वैपायनायसः ॥ सवैमह्यंम
हाराजभगवान्बादरायणः ॥ इमांभागवतींप्रीतःसंहितांवेदसंमिताम् ॥ ३५ ॥ एतांवक्ष्यत्यसौ
सूतऋषिभ्योनैमिषालये ॥ दीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ॥ ३६ ॥ इतिश्रीमद्भागवतेम
हापुराणेपारमहंस्यांसंहितायांवैयासिक्यांद्वादशस्कंधेपरमात्मनिर्णयश्चतुर्थोऽध्यायः ॥ ४ ॥
श्रीशुकउवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णंविश्वात्माभगवान्हरिः ॥ यस्यप्रसादजोब्रह्मारुद्रःक्रोधस

त्यभिप्रेत्यपुराणार्थमनुस्मारयति अत्रेति अयंभावः जगतःकर्त्ताब्रह्मापियस्यप्रसादजःप्रसादोऽत्ररजोवृत्तिर्हर्षस्त
तोजातत्वात्तत्परतंत्रः सर्वसंहर्तारुद्रश्चयस्यक्रोधसंभवोनतुस्वतंत्रः सविश्वस्यात्मानियंताभगवानत्रानुवर्ण्य
ते अतएवंभूतंभगवंतंशृण्वतःकुतोन्यस्माद्भयशंकेति ॥ १ ॥

॥भा०द्वा०॥ ॥१९॥

अतस्त्वमेवं चिंतयेत्याह। एवमिति। आत्मस्थं देहाद्युपाधिस्थितं आमृश विचारय। अनुमानगर्भिण्या दृग्दृश्ययोरन्वयव्य
तिरेकयुक्त्या ॥९॥ एवं च सति त्वां तक्षको न दहेदित्याह। चोदित इति। तत्र हेतवः। मृत्यव इति। मृत्युहेतवः ॥१०॥ विमर्शप्रकारं द
र्शयन् तक्षकादर्शनं दर्शयति द्वाभ्याम्। योऽहं स ब्रह्मैव यद्ब्रह्म तदहमेवेति समीक्ष्य। तत्राहं ब्रह्मेति भावनया जीवस्य शोका
दिनिवृत्तिः ब्रह्माहमिति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यतिहारो दर्शितः। निष्कले निरुपाधौ आत्म

एवमात्मानमात्मस्थमात्मनैवामृश प्रभो। बुद्ध्याऽनुमानगर्भिण्या वासुदेवानुचिंतया ॥९॥ चोदि
तो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः। मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरम् ॥१०॥ अहं ब्र
ह्म परं धाम ब्रह्माहं परमं पदम्। एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले। दशंतं तक्षकं पा
दे लेलिहानं विषाननैः। न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥१२॥ एतत्ते कथितं तात यथात्मा
पृष्टवान्नृप। हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥१३॥ इति श्रीमद्भागवते महापुराणे
पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे प्रलयप्रमाणलक्षणं पंचमोऽध्यायः ॥५॥

नि ब्रह्मणि। विषयुक्तैराननैर्दशन्तं तक्षकं लेलिहानं सर्पम्। यद्वा लेलिहानं जिह्वाभिरोष्ठप्रान्तं सनिध्येय मास्वादयंतम्
आत्मनः पृथक् ॥१२॥ हरेश्चेष्टां आत्मा त्वम्। यत्पृष्टवानसि तदेतत्कथितम्। शिष्यस्य कृतार्थतापरीक्षणाय पृच्छति किमिति ॥१३॥

इति द्वादशस्कंधे पंचमोऽध्यायः ॥५॥

यस्माद्देहोपाधिकोयमात्मनोजन्मादिसंसारभ्रमः ॥ तस्मादुपाधिनिरस्तौमुच्यत इतिसदृष्टांतमाह ॥ घटइतियथापुराघटो
पाधेःपूर्वमपिपुनर्घटेभिन्नेतदंतर्वर्त्यपिवकाश आकाशएवस्याद्यथा ॥ एवंदेहेमृतेतत्वज्ञानेनलीनेसति ॥५॥ ज्ञानेनलयंसंभा
वयितुंमायाकृतमात्मनोदेहाद्युपाधिसंबंधप्रकारमाह ॥ मनइति ॥ मनआत्मनोदेहादीन्सृजति ॥ तच्चमनोमायासृजति
ततोमायाद्युपाधिमुदयात् ६ एतदेवसदृष्टांतमाहसार्द्धेन ॥ स्नेहेतिदीपस्यज्योतिषःदीपत्वंज्वालारूपःपरिणामः ॥ त

घटेभिन्नेयथाकाश आकाशःस्याद्यथापुरा ॥ एवंदेहेमृतेजीवोब्रह्मसंपद्यतेपुनः ॥५॥ मनःसृ
जतिवैदेहान्गुणान्कर्माणिचात्मनः ॥ तन्मनःसृजतेमायाततोजीवस्यसंसृतिः ॥६॥ स्ने
हाधिष्ठानवर्त्यग्निसंयोगोयावदीयते ॥ ततोदीपस्यदीपत्वमेवंदेहकृतोभवः ॥ रजःसत्वत
मोवृत्त्याजायतेथविनश्यति ॥ नतत्रात्मास्वयंज्योतिर्योव्यक्ताव्यक्तयोःपरः ॥ आकाशइवचा

वत्तैलस्थानीयंकर्मतदधिष्ठानस्थानीयंमनः ॥ वर्त्तिस्थानीयोदेहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानी
यःसंसारइतियोज्यम् ॥ देहकृतःदेहनिर्बंधनः ॥ यद्वा देहकृतोमनसोनत्वात्मनः ॥ अतोदीपवत्संसारएवनश्यतिनत्वात्मा
ज्योतिर्वदित्याहनेति ॥ नतुतत्रप्रतीयमान ॥ आत्मा कुतइत्यत आह ॥ यइति ॥ व्यक्तयोः ॥ स्थूलसूक्ष्मदेहयोःपरोऽन्यः ॥ अ
तःस्वयंज्योतिः ॥ परत्वेप्रपंचयति आकाशइवेति ॥ आधारोदेहादिप्रपंचस्यध्रुवोनिर्विकारःनास्त्यन्तउपमाचयस्यसोन

२

२

किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्राह सिद्धोहं न किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह ॥ अनुजानीहीति ॥ वाचमित्यु
पलक्षणं सर्वेन्द्रियाणाम् ॥ वाचं नियम्य किं करिष्यसि ॥ तत्राह ॥ मुक्ताः कामाशया यत्तद्वासनायेन तच्चेतः ॥ अधोक्षजे प्रवेश्य
असून्विसृजामि ॥६॥ ननु किं प्राणत्यागेन ॥ किंचित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राह ॥ अज्ञानं चेति ॥ चकारात्तत्संस्का

अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥६॥
अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदम् ॥७॥ सूत उवाच ॥
इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥८॥ परीक्षि
दपि राजर्षिरात्मन्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः ॥ प्राक्कूले ब
र्हिष्यासीनो गंगाकूल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः ॥१०॥ तक्ष
कः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना ॥ हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपम् ॥११॥

राश्च तच्च त्वत्कृपयैवेत्याह ॥ भवतेति ॥७॥८॥ आत्मना बुद्ध्या ॥ आत्मानं मनः ॥ आत्मनि प्रत्यक्प्रकाशे समाधाय परमा
त्मानं दध्यौ अस्पंदासुः लीनप्राणः यथा तरुः स्थाणुः ॥ तमेव विशिनष्टि ॥ प्राक्कूले प्रागग्रे बर्हिषि दर्भे ॥१०॥ तदेवं ब्रह्मभू
ते तस्मिन्तक्षकागमनादिकं पिष्टपेषणमिवाभवदिति दर्शयति ॥ तक्षक इति त्रिभिः हे विप्राः ॥११॥

षष्ठे परीक्षितो मोक्षः सर्पहोमादि तत्सुतात् ॥ वेदशाखाविभागोक्तौ त्रिवेदी व्यासवर्णनम् ॥ एतत्पुराणं निशम्य ॥ निखिलात्मा हरिः
तं पश्यति निखिलं वा आत्मनि पश्यतीति तथा तेन ॥ अतः समेन ॥ नतेन अवनतेन मूर्ध्ना तत्पादतलमुपसृत्य तस्य पादौ
शिरसि निधायेत्यर्थः ॥१॥ सिद्धः कृतार्थो ऽस्मि यतो ऽनुगृहीतो ऽस्मि ॥ अनुग्रहमेवाह ॥ यत् यस्मात् श्रावितः चशब्दात्तत्प्रा

सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ त
त्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धाञ्जलिस्तमिदमाह स विष्णुरातः ॥१॥ राजोवाच ॥ सिद्धो
ऽस्म्यनुगृहीतो ऽस्मि भवता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥२॥ ना
त्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥३॥ पुराणसं
हितामेतामश्रौष्म भवतो वयम् ॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥४॥ भगवंस्त
क्षकादिभ्यो मृत्युभ्यो न विभेम्यहम् ॥ प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ॥५॥ श्री ॥

प्तिसाधनं च ॥२॥ करुणात्मनामभिनंदति द्वाभ्यां नात्यद्भुतमिति ॥३॥ अश्रौष्म श्रुतवंतः भवतः शकाशात् ॥४॥ सिद्धो ऽस्मीत्यु
क्तं तदेवाविष्करोति भगवन्निति यतः ॥ त्वया दर्शितं ब्रह्म प्रविष्टः कथंभूतं अभयम् यतो निर्वाणं कैवल्यरूपम् ॥५॥ ॥०॥

कस्मात्तक्षको न दस्संतेत्युक्ताः संतो द्विजा ऊचुः तमिति ॥ तेन इंद्रेण असौ सर्पः ॥ १५ ॥ ऋत्विजः प्रतिप्राह स हेन्द्रः इंद्रसहितः किमि
ति न पात्यते ॥ १६ ॥ तद्राज्ञो वचः श्रुत्वा आजुहुवुः ॥ साक्षेपमाह्वानं दर्शयति तस्येति ॥ इहाग्नावाशु पत मरुत्वता मरुद्गणवता

तं गोपायति राजेन्द्र शक्रः शरणमागतम् ॥ तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥ १७ ॥ पारी
क्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ॥ सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥ १८ ॥ तच्छ्रुत्वा
जुहुवुर्विप्राः सहेंद्रं तक्षकं मखे ॥ तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता ॥ २० ॥ इति ब्रह्मोदिता
क्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥ २१ ॥ तं पतंतं विमा
नेन सह तक्षकमंबरात् ॥ विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥ २२ ॥ नैष त्वया मनुष्ये
द्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतमथवा अजरामरः ॥ २३ ॥ जीवितं मरणं जंतोर्गतिः
स्वेनैव कर्म्मणा ॥ राजंस्ततोऽन्यो नास्त्यस्य प्रदाता सुखदुःखयोः ॥ २४ ॥

इंद्रेण सह ॥ २० ॥ ब्राह्मणोहृतैः आक्षेपैः परुषवाक्यैः ॥ २१ ॥ सतक्षकम् ॥ अंगिरसः पुत्रो बृहस्पतिः प्राह ॥ भवतु नाम अजरामरः तथा
पि पितृमारकं धक्ष्यामीति चेत्तत्राह ॥ जीवितमिति गतिः ॥ परलोकः अतो दुर्मरणनिमित्तापि तु दुर्गतिरनेन कृतेत्यपि न शं

तंविपश्चित्किलतस्यापरीक्षिद्रक्षणेनद्रव्याजेनायागच्छंतंतत्रस्वालीठवरवृक्षस्यभस्मीभूतस्यपुनरंकुरादिक्रमेणोत्पा
पनाद्विषहारिणंतर्पयित्वाद्रविणैः संतर्प्यततोनिवर्त्यद्विजरूपेणांतिरोहितः सन्नदशत् ॥ ११ ॥ तच्चपुत्रकृत्यमिवज्ञा
तमित्याह ॥ ब्रह्मभूतस्येति ॥ १२ ॥ तत्क्षणंसर्वेषांदुःखंचततःपरमुत्साहंचाह ॥ हाहाकार इतिद्वाभ्याम् ॥ १३ ॥ १४ ॥ प्रासंगि

तंतर्पयित्वाद्रविणैर्निवर्त्यविषहारिणम् ॥ द्विजरूपप्रतिच्छन्नःकामरूपोदशन्नृपम् ॥
॥ ११ ॥ ब्रह्मभूतस्यराजर्षेर्देहोहिगरलाग्निना ॥ बभूवभस्मसात्सद्यःपश्यतांसर्वदेहिनाम् ॥
॥ १२ ॥ हाहाकारोमहानासीद्भुविखेदिक्षुसर्वतः ॥ विस्मिताअभवन्सर्वेदेवासुरनरादयः ॥ १३ ॥
देवदुंदुभयोनेदुर्गन्धर्वाप्सरसोजगुः ॥ ववृषुःपुष्पवर्षाणिविबुधाःसाधुवादिनः ॥ १४ ॥
जनमेजयःस्वपितरंश्रुत्वातक्षकभक्षितम् ॥ यथाजुहावसंक्रुद्धःसर्पान्सत्रेसहद्विजैः ॥ १५ ॥
सर्पसत्रेसमिद्धाग्नौदह्यमानान्महोरगान् ॥ दृष्ट्वेन्द्रंभयसंविग्नस्तक्षकःशरणंययौ ॥ १६ ॥
अपश्यंस्तक्षकंतत्रराजापारीक्षितोद्विजान् ॥ उवाचतक्षकःकस्मान्नदह्येतोरगाधमः ॥ १७ ॥

कमाह ॥ जनमेजयइत्यादि ॥ सर्पाभिचारसत्रेद्विजैःसहवर्त्तमानः ॥ यथावदाजुहावजुहावेतिवा ॥ सर्वसर्पाह्वानेकारणमाह

म॰ कू॰ टी॰ आ॰ ४७

कथंतर्हि मायातत्कार्य्यनिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरिति शास्त्रार्थ
मुपसंहरति नयत्रेति पंचभिः ॥ दंभी इति या माया कपटवानयं पुमानित्येवं भवता यां बुद्ध्वा सकृदुल्लिख्यमाना या
मायेत्यर्थः ॥ सा आत्मवादे क्रियमाणे आत्मवादिभिर्यत्र अभया न विराजिता न प्रकाशिता किंतु भीता भीतेव स्वका
र्य्यमोहादिकमकुर्वती कथंचिद्वर्त्तत इति प्रतिपादितेत्यर्थः ॥ तदुक्तम् ॥ नमस्तेभगवते वासुदेवाय धीमहि ॥ य
न्मयया मां वदंति जगद्गुरुम् ॥ विलज्जमानया यस्य स्थातुमीक्षापथेमुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धि

नयत्रदंभीत्यभयाविराजितामायात्मवादेऽसकृदात्मवादिभिः ॥ नयद्विवादोविविध
स्तदाश्रयोमनश्चसंकल्पविकल्पवृत्तियत् ॥ २९ ॥ नयत्रसृज्यंसृजतोभयोःपरंश्रे
यश्चजीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीन्विरमेतस्व

यमिति ॥ किंच यत्र यस्मिन् तदाश्रयो मायाश्रयो विविधो विवादोपि नास्ति विशेषविषयत्वाद्विवादानां तस्य च विशेषा
तीतत्वादिति भावः ॥ संकल्पविकल्पा वृत्ती यस्य तन्मनोपि यत्र नास्ति ॥ संकल्पविकल्पानामपि विशेषविषयत्वात्
॥ २९ ॥ किंच सृज्यं कर्म सृजतां कारकवर्गेण सह उभयोः सृज्यसृष्टोः परं साध्यं श्रेयः फलमपि अतः ॥ त्रिभिः सृज्यसृष्टृफ
लैरन्वितो जीवश्चाहंकारात्मको यत्र नास्ति अत एव उत्सादितो निरस्तो बाध्यबाधको यस्मिन् तदेतत्स्वयमात्मस्वरू
पमित्यर्थः ॥ तत्र तस्मिन् ऊर्मीन् अहंकारादीन् निषिध्य विरमेत विशेषेणा क्रीडेदित्यर्थः ॥ ३० ॥

कथमन्यः सुखदुःखप्रदाता नास्तीति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह ॥ सर्पादिना जन्तुः पंचत्वं मृत्युमृच्छते प्राप्नो
तीति यत्तत्तत् ॥ आरब्धं कर्म्मैव भुंक्ते स्वकर्म्मप्रयुक्ता एव सर्प्पादयो न स्वतंत्रा इति भावः ॥ २५ ॥ संस्थीयेत समाप्यताम्
अभिचारिकं हिंसाफलम् ॥ दिष्टं प्राचीनकर्म्म ॥ अतः सर्प्पा दिष्टप्रयुक्तास्तत्वाप्ययं नापराध इति भावः ॥ २६ ॥ वाक्पतिं
बृहस्पतिं ॥ २७ ॥ ननु कथं विदुषामप्येवं संमोहः ॥ यतो ब्रह्मकोपात्परीक्षितो मृत्युः ॥ जनमेजयकोपाच्च सर्प्पाणामि

सर्प्पचौराग्निविद्युद्भ्यःक्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छते जन्तुर्भुंक्ते आरब्धकर्म्म तत्
॥ २५ ॥ तस्मात्सत्रमिदं राजन् संस्थीयेताभिचारिकम् ॥ सर्प्पा अनागसो दग्धा जनैर्दिष्टं हि
भुज्यते ॥ २६ ॥ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्प्पसत्रादुपरतः पूजयामास
वाक्पतिम् ॥ २७ ॥ सैषा विष्णोर्महामायाऽबाध्ययाऽलक्षणा यया ॥ मुह्यन्त्यस्यैवात्मभूता

स्यादित्तत्राह ॥ सैषेति ॥ तस्या महत्त्वं दर्शयति ॥ अलक्षणा न लक्ष्यत इत्यलक्षणा अप्रतर्क्येत्यर्थः ॥ कासावित्यत आह यया
यास्य विष्णोरेवात्मभूता आत्मांशभूताः ॥ प्राणिनः गुणवृत्तिभिः क्रोधादिभिः ॥ भूतेषु देहेषु मुह्यंति बाध्यबाधकतां
व्रजंतीत्यर्थः ॥ ननु श्रवणादिना बाधितेयात्तया कुतो मोहः स्यात्तत्राह ॥ अबाधया बाधितुमशक्यया ॥ २८ ॥ २८ ॥

भा०द्वा० ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह ॥ समाहितात्मन इत्यष्टभिः ॥ ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत्तस्य ॥ कर्णपुटपिधाने श्रोत्र
वृत्तिनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ॥ ३६ ॥ प्रसंगान्नादोपासकानां मोक्षफलमाह ॥ यस्य नादस्योपासनया आ
॥ २३ ॥ त्मनो मलं धूत्वा अपोह्य कथंभूतं ॥ तमाह ॥ द्रव्यमधिभूतम् ॥ क्रिया अध्यात्मं कारकमधिदैवमेवं त्रिधाभूताख्या यस्य

सूत उवाच ॥ समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभा
व्यते ॥ ३७ ॥ यदुपासनया ब्रह्मन्योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भ
वम् ॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥

इति तथाभूतम् ॥ ३८ ॥ त्रिवृत् त्रिमात्रः कंठोष्ठादिभिरुच्चार्यमाणस्योंकारस्याक्षरस्याम्नायात्तभावात्तत्सूक्ष्मतया तं वि
शिनष्टि ॥ अव्यक्तः प्रभवो यस्य सः ॥ तदेवाह स्वराट् ॥ स्वत एव हृदि प्रकाशमानः ॥ तमेव कार्येण लक्षयति ॥ यत्तदिति ॥ नपुं
सकत्वं लिंगशब्दविशेषणत्वात् लिंगं गमकम् ॥ ३९ ॥ कोऽसौ परमात्मा तमाह शृणोतीति ॥ इमं स्फोटं ॥ अव्यक्तमोंकारम्

यतस्तद्वैष्णवं पदमामनंतीत्याह ॥ परमिति ॥ यदेतत्तदेव परमं वैष्णवं पदं स्वरूपमामनंति ॥ अतत् ॥ आत्मव्यतिरिक्तं ॥ उत्सि-
सृक्षवः त्यक्तुमिच्छवः यतः ॥ अनन्यसौहृदाः ॥ नास्ति अन्यस्मिन् सौहृदयं येषां ते ॥ कुतः दौरात्म्यं देहाद्यहंभावं विसृज्य ॥ देहे-
ऽहंकाराभावादन्यत्र सौहृदं नास्ति अतस्त्यक्तुमिच्छव इत्यर्थः कथं नेति नेतीत्येव अत्राविद्वदनुभवमपि प्रमाणयति ॥ हृ-
दोपगुह्य ध्यानादिना ततः समाहितैरवसितं निश्चितम् ॥ यद्वा ॥ अवसितमवबद्धमात्मतया गृहीतमित्यर्थः ॥ ३१ ॥ एवं

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदो-
पगुह्यावसितं समाहितैः ॥ ३१ ॥ त एतदधिगच्छंति विष्णोर्यत् परमं पदम् ॥ अहं ममेति दौर्जन्यं न ये-
षां देहगेहजम् ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित्
नमो भगवते तस्मै कृष्णायाकुंठमेधसे यत्पादांबुरुहध्यानात् संहितामध्यगामिमाम् ॥ ३४ ॥ शौन-
क उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कथिता व्यस्ता एतत्सौम्याभि-

प्राप्तावधिकारिणो दर्शयति ॥ त एतदिति ॥ देहजमहमिति गेहजं ममेति ॥ ३२ ॥ प्राप्त्युपायमाह ॥ अतिवादानिति ॥ ३३ ॥ शास्त्रसं-
माप्तौ गुरुं प्रणमति नम इति ॥ कृष्णाय व्यासाय ॥ अध्यगां अधिगतवानस्मि ॥ ३४ ॥ इमां संहितामध्यगामीत्युक्तम् ॥ तत्र पु-
राणसंहिताविभागं विशेषतो बुभुत्सुर्वेदविभागमपि प्रसंगात्पृथक् पृच्छति ॥ पैलादिभिरिति ॥ ३५ ॥

॥भा॰द्वा॰॥ ततस्तेभ्योवर्णेभ्यः॥ अक्षराणांसमाम्नायंसमाहारम्॥ तमेवाह॥ अंतस्थायरलवाः॥ उष्माणः॥ शषसहाः॥ स्वराअकाराद्याः
स्पर्शाः ककारादयः॥ ह्रस्वदीर्घाश्च॥ आदिशब्दाज्जिह्वामूलीयादयः॥ तएवलक्षणांस्वरूपंयस्यतम्॥ विभुः चतुर्मुखस्वरूपो
॥२४॥ भगवान् असृजदितिपूर्वस्यैवानुषंगः॥ चातुर्होत्रविवक्षया॥ चत्वारोहोत्रोपलक्षिताऋत्विजश्चतुर्होतारः तैरनुष्ठेयं

ततोऽक्षरसमाम्नायमसृजद्भगवानजः॥ अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्॥ तेनासौ
चतुरोवेदांश्चतुर्भिर्वदनैर्विभुः॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया॥ ४२॥ पुत्रानध्याप
यत्तांस्तुब्रह्मर्षीन्ब्रह्मकोविदान्॥ तेतुधर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥ तेपरंपरयाप्रा
प्तास्तत्तच्छिष्यैर्धृतव्रतैः॥ चतुर्युगेष्वथव्यस्ता द्वापरादौमहर्षिभिः॥ क्षीणायुषः क्षीणस
त्वान्दुर्मेधान्वीक्ष्यकालतः॥ वेदान्ब्रह्मर्षयोव्यस्यन् हृदिस्थाच्युतचोदिताः॥ ४३॥ ४४॥ ४५॥

होत्राध्वर्यवादिकंकर्मचातुर्होत्रंतद्विवक्षया॥ ४२॥ पुत्रान्मरीच्यादीन्॥ तान्वेदान्ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान्॥ ४३॥
एवंचतुर्युगेषुप्राप्ताः॥ द्वापरादौद्वापर॥ आदिर्यस्यतद्दंशलक्षणस्यकालस्य॥ तस्मिन्द्वापरान्तेवेदविभागप्रसिद्धेःशंतनुसम
कालव्यासावतारप्रसिद्धेश्च॥ व्यस्ताविभक्ताः॥ ४४॥ तत्रहेतुः॥ क्षीणायुर्बोजनात् तर्हिपुरुषबुद्धिप्रभवत्वादनादरणीयंस्यादित्या

४३॥ [illegible]

ननुजीवएवतंशृणोतु ॥ नेत्याह ॥ सुप्तश्रोत्रेकर्णापिधानाविनाअवृत्तिकेपिश्रोत्रेसति जीवस्तुकरणाधीनज्ञानत्वात् ॥ नतदा
श्रोता ॥ तदुपलब्धिस्तुतस्यपरमात्मद्वारिकैवेतिभावः ॥ ईश्वरस्तुनैवम् ॥ यतःशून्यदृक् शून्येपींद्रियवर्गेदृक्ज्ञानंयस्य ॥ त
थाहिसुप्तोयदाशब्दंश्रुत्वाप्रबुध्यते ॥ नतदाजीवःश्रोतालीनेन्द्रियत्वात् ॥ अतोयस्तदाशब्दंश्रुत्वाजीवंप्रबोधयति ॥ स
यथापरमात्मैवतद्वत् ॥ कोसावोंकारः तंविशिनष्टिसार्द्धेनयेनवाक्करहतीअज्यतेयस्यचहृदयाकाशेआत्मनःसका
शादभिव्यक्तिः ॥ ३९ ॥ किंचस्वधाम्नःस्वस्याश्रयःकारणंयत्ब्रह्मतस्य ॥ किंच ॥ परमात्मासंभूतसमस्तदेवतावाचको

शृणोतियइमंस्फोटंसुप्तश्रोत्रेवशून्यदृक् ॥ येनवाग्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः ॥ ३९ ॥
स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः ॥ ससर्वमंत्रोपनिषद्वेदबीजंसनातनम् ॥ ४० ॥
तस्यह्यासंस्त्रयोवर्णाअकाराद्याभृगूद्वह ॥ धार्यन्तेयैस्त्रयोभावागुणनामार्थवृत्तयः ॥ ४१ ॥

पीत्याशयेनाह ॥ सइति ॥ सर्वमंत्राणामुपनिषद्रहस्यसूक्ष्मंरूपमित्यर्थः ॥ तत्रहेतुःवेदानांबीजंकारणम् ॥ बीजत्वेप्यविका
रितामाह ॥ सनातनंसदेकरूपं ॥ तस्यब्रह्मरूपत्वात् ४० ॥ इदानींततसर्वप्रपंचोत्पत्तिप्रकारमाह ॥ तस्यह्येति ॥ त्रयस्त्रिसं
ख्याअस्फुटाभावयेरकारोकारमकारैर्धार्यन्ते ॥ तत्कारणत्वात् ॥ तानेवाह गुणाःसत्वादयः ॥ नामानिऋग्यजुःसामानि
अर्थाभूर्भुवःस्वर्लोकाःवृत्तयोजाग्रदाद्याः ॥ ४१ ॥

तत्रऋग्वेदेशाखाविभागमाह पैलइति ॥ स्वसंहितांद्वेधाविभज्यइंद्रप्रमितयेवाष्कलायचऊचे ॥ सवाष्कलोपिस्वसंहितांचतुर्धाव्यस्यबोध्यादिभ्यःचतुर्भ्यःशिष्येभ्यःआह हेभार्गवइंद्रप्रमितिरपिस्वांसंहितांस्वसुतंमाण्डुकेयमध्यापयामास ॥५१॥ तस्यमाण्डुकेयस्यशिष्योदेवमित्रः ॥५२॥ तत्सुतःमाण्डुकेयसुतः ॥ शाकल्यः ॥ वात्स्यादिषुपंचस्वधातु तानध्यापयामासे

पैलःस्वसंहितामूचइन्द्रप्रमितयेमुनिः ॥ वाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकाम् ॥
चतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गव ॥ पराशरायाग्निमित्रइंद्रप्रमितिरात्मवान् ॥ अ
ध्यापयत्संहितांस्वांमाण्डुकेयमृषिंकविम् ॥५१॥ तस्यशिष्योदेवमित्रःसौभर्यादिभ्यऊचिवान् ॥५२॥
शाकल्यस्तत्सुतःस्वांतुपंचधाव्यस्यसंहिताम् ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥
जातूकर्ण्यश्चतच्छिष्यःसनिरुक्तांस्वसंहिताम् ॥ बलाकपैजवैतालविरजेभ्योददौमुनिः ॥५४॥
वाष्कलिःप्रतिशाखाभ्योवालखिल्याख्यसंहिताम् ॥ चक्रेवालायनिर्भज्यःकासारश्चैवतांदधुः ॥५५॥

त्यर्थः ॥५३॥ तच्छिष्यःशाकल्य ॥ शिष्यःस्वसंहितांत्रेधाविभज्यचतुर्थंवैदिकपदार्थव्याख्यानरूपंनिरुक्तंचकृत्वाबलाकादिभ्यश्चतुर्भ्योददौ ॥५४॥ वाष्कलिःपूर्वोक्तस्यवाष्कलस्यपुत्रः ॥ प्रतिशाखाभ्यःउद्धृत्यसर्वशाखाभ्यः ॥ वालायन्यादयस्तामादधुः ॥ अधी

एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे ॥ विशेषतो निरूपयितुमाह ॥ अस्मिन्नपीति ॥ अंशो मायातस्यांशः सत्वं त
स्य कलया अंशेन अवतीर्णः सन् ॥ ४६ ॥ चातुर्विध्यमेवाह ॥ ऋगिति ऋगादिमंत्राणां राशीन् वर्गशस्तत्तत्प्रकरणभेदेरुद्धृत्य य
थानेकविधमणिराशेर्मणिगणाः पद्मरागादयो विविच्योद्ध्रियन्ते तद्वदुद्धृत्य ते मंत्रैश्चतस्र ऋगादिसंहिताश्चक्रे ॥ ४७ ॥ तासां

अस्मिन्नप्यन्तरे ब्रह्मन् भगवाल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ परा
शरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ४६ ॥ ऋगथर्व
यजुःसाम्नां राशीमुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥ ४७ ॥ तासां स चतुरः
शिष्यानुपाहूय महामतिः ॥ एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ४८ ॥ पैलाय संहितामा
द्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥ ४९ ॥ साम्नां जैमिनये प्रा
ह यथा सैच्छन्दोगसंहिताम् ॥ अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ॥ ५० ॥ ऽऽ ॥ ० ॥

संहितानां मध्ये एकैकाम् ॥ ४८ ॥ ऋचां समुदायरूपत्वात् बह्वृचाख्याम् ॥ नितरां प्रश्लेषेण गद्यगानत्वान्निगदाख्यम् ॥ ४९ ॥
छन्दः सुगीयमानत्वात् छन्दोगाख्यां संहिताम् ॥ ५० ॥

कारावमाध्यंदिनादिशाखाप्रसंगमाह॥याज्ञवल्क्यइत्यादिना॥गुरोर्वैशंपायनस्यव्यासेनविभज्यानुक्तत्वादविद्यमानानिअधिअ
धिकानिगवेषयन्मृगयन्सूपतस्थेसम्यक्स्तुतवान्॥ईश्वरंवेदानाम्॥तथाचश्रुतिः॥ऋग्भिःपूर्वाह्णेदिविदेवईयतेयजुर्वेदे
तिष्ठतिमध्येअन्हःसामवेदेनास्तमयेमहीयतेवेदैरशून्यस्त्रिभिरेतिसूर्यइति॥६७॥नमोभगवतेतुभ्यंआदित्याययोभगवा
नेकएवेमांलोकयात्रामनुवहतीत्यन्वयः॥तदेवदर्शयति॥अखिलजगतामात्मस्वरूपेणान्तर्हृदयेषुकालस्वरूपेणचबहि

याज्ञवल्क्यस्ततोब्रह्मंश्छंदांस्यधिगवेषयन्॥गुरोरविद्यमानानिसूपतस्थेऽर्कमीश्वरम्॥६७॥या
ज्ञवल्क्यउवाच॥ॐनमोभगवतेआदित्यायाखिलजगतामात्मस्वरूपेणकालस्वरूपेणचचतु
र्विधभूतनिकायानांब्रह्मादिस्तंबपर्य्यन्तानामन्तर्हृदयेषुबहिरपिचाकाशइवोपाधिनाऽ
व्यवधीयमानोभगवानेकएवक्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादान
विसर्गाभ्यामिमांलोकयात्रामनुवहति॥६८॥

रपिवर्त्तमानइति॥अखिलजगतामित्यस्यप्रपंचः॥चतुर्विधेति॥हृदयान्तर्वर्त्तित्वेऽपिजीववत्तेनोपाधिनाऽव्यवधीयमा
नः॥अनाच्छाद्यमानः॥कालस्वरूपेणचेत्यस्यप्रपंचः॥क्षणेति॥क्षणलवादयोयेऽवयवास्तैरुपचितानां॥संवत्सराणांतेषांगणेन
प्रत्यब्दमपामादानंशोषणंविसर्गोवृष्टिस्ताभ्याम्॥अनेनगायत्रीप्रथमपादोक्तंवरेण्यत्वमनुवर्णितम्॥६८॥ • ॥०॥

ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह बह्वृचा इति एतत छन्दसामेतेषां छन्दसाम ॥२६॥ यजुर्वेदे तैत्तिरीयशाखोत्पत्ति
प्रस्तावमाह ॥ वैशंपायनशिष्या इत्यादिना ॥ चरकनामनिरुक्तिमाह ॥ यत यस्माच्चेरुरिति ॥ ब्रह्महत्यारूपमंहः क्षपयतीति तथा
तत्स्वगुरोरनुष्ठेयं व्रतम ॥ तच्चकार इत्यर्थः ॥२७॥ तच्छिष्यो वैशंपायनशिष्यः ॥ अल्पसाराणामेतेषां चरितेन कियत्सुदु

बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतत छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥२६॥ वैशं
पायनशिष्या वै चरकाध्वर्यवोऽभवन ॥ यैश्चीर्णं ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम ॥२७॥ याज्ञ
वल्क्यस्तु तच्छिष्य आहाहो भगवन कियत ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम ॥२८॥
इत्युक्तो गुरुरप्याह कुपितो याज्ञवल्क्यं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ॥२९॥ दे
वरातसुतः सोपि छर्दित्वा यजुषां गणम ॥ ततोगतोथ मुनयो ददृशुस्तान यजुर्गणान ॥३०॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ॥ तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥३१॥

श्चरमहं चरिष्यामीति ॥२८॥ विप्राणामवमंत्रा अवज्ञाकर्त्रा मत्तोधीतमाशु त्यजेति ॥२९॥ देवरातसुतो याज्ञवल्क्यः ॥३०॥ छर्दि
तस्यादाने विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वा आददुः ॥ ततश्च तैत्तिरीया इति प्रसिद्धाः सुपेशला अ
तिरम्याः बहुवचनमवांतरभेदविवक्षया ॥३१॥

त्रितीयपादमेवमंडलस्य परः तया व्याचक्षाणः स्तौति ॥ य एवेति ॥ य एव भवान् ॥ अतिकरालवदनो योऽन्धकारसंज्ञो अ
जगरग्रहस्तेन गलितमत एव मृतकमिव विचेतनं स्वधर्माख्यं यदात्मावस्थानं प्रत्यक्प्रवणत्वं तदेव श्रेयस्तस्मिन्प्र

य एवेमं लोकमतिकरालवदनान्धकारसंज्ञाजगरग्रहगलितं मृतकमिव विचेतनमव
लोक्यानुकंपया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्या
त्माऽवस्थाने प्रवर्त्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति परित आशापालै
स्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ॥६६॥ अथ ह भगवंस्तव चरणनलिनयुगलं त्रि
भुवनगुरुभिरभिवंदितमहमयातयामयजुष्काम उपसरामीति ॥६७॥ सूत उवाच ॥ एवं स्तु
तः स भगवान् वाजिरूपधरो रविः ॥ यजूंष्ययातयामानि मुनयेदात्प्रसादितः ॥६८॥ ॥ ऽऽ

वर्त्तयति ॥ किंच ॥ यो भवान् अवनिपतिरिवाटति गच्छति ॥ आशापालैरिन्द्रादिभिः ॥ कमलकोशयुक्तैस्तत्तुल्यैर्वांजलिभिः
उपहृतार्हणो रत्तार्घः ॥६६॥ यत एवंभूतस्त्वम् ॥ अथ अतः ह स्फुटं ॥ अयातयामानि ॥ अन्यैर्यथावदविज्ञातानि यानि यजूं
षि तत्कामोऽहमुपसरामि भजामि ॥६७॥ एवं स्तुतः प्रसादितश्च ॥६८॥

द्वितीयपादार्थानुवर्णनेनस्तौति ॥ यदुतेति ॥ हेविबुधर्षभः ॥ हेसवितः ॥ यदप्यहोभगवतस्तवमंडलंतपतितत्समभि
धीमहिसम्यगाभिमुख्येनध्यायेम ॥ पुनस्तस्यैवसंबोधनं ॥ प्रत्यहंत्रिषुवर्णावैदिकमार्गेणास्तुवतांभक्तानांयान्य
खिलानिदुरितानितत्फलानिचवृजिनानिदुःखानितेषांबीजमज्ञानंचतेषामवभंजनविनाशक ॥ हेतपनेति ६४ ॥

यदुतवावविबुधर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधि ॥ नोपतिष्ठमाना
नामखिलदुरितवृजिनबीजावभर्जनभगवतः ॥ सममभिधीमहितपनमण्डलम् ॥ ६४ ॥
यइहवावस्थिरचरनिकराणांनिजनिकेतनानांमनइंद्रियासुगणाननात्मनः ॥ स्व
यमात्मान्तर्यामीप्रचोदयति ॥ ६५ ॥

तृतीयपादेनस्तौति ॥ यइहेति ॥ योभवान्स्थावरजंगमसमूहानांस्वाश्रयाणांजीवानांमनइंद्रियप्राणगणान् ॥
अनात्मनोजडान्स्वयमात्मैवान्तर्यामीसन्प्रचोदयतिप्रवर्त्तयति ॥ ६५ ॥

पौष्यंज्यावन्त्ययोरपिचकाराद्धिरण्यनाभस्यापिपंचशतानिशिष्या आसन्नितेतावतीः शाखायथाक्रमंजगृहुः ॥ तानुदी
च्यान्सतः काश्चित्प्राच्यांश्चप्रचक्षतइत्यर्थः ॥ यथोक्तंवेहस्यवेउदीच्याः सामगाः शिष्यास्तस्यपंचशतंस्मृताः हिरण्यना
भातथैवस्यः संहितायैर्द्विजोत्तमैः ग्रहीतास्तेपिचोच्यन्तेपण्डितैः प्राच्यसामगाइति ॥७१॥ पुनरप्येतेषांत्रयाणांसुकर्म
णः शिष्याणांशिष्यान्तरैः शाखावाहुल्यंदर्शयति लोकाक्षिरितिद्वाभ्याम् ॥७३॥ कृतोनामहिरण्यनाभस्यशिष्यः स्वशि

उदीच्याः सामगाः शिष्या आसन्पंचशतानिवै ॥ पौष्यंज्यावन्त्ययोश्चापितांश्चप्राच्यान्प्र
चक्षते ॥७२॥ लोकाक्षिर्लौगाक्षिः कुल्यः कुसीदः कुक्षिरेवच ॥ पौष्यंजिशिष्याजगृहुः संहितास्ते
शतंशतम् ॥७४॥ कृतोहिरण्यनाभस्यचतुर्विंशतिसंहिताः ॥ शिष्यऊचेस्वशिष्येभ्यः शेषाआवं
त्यआत्मवान् ॥७५॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांद्वादशस्कंधेवे
दशाखाप्रणयनेषष्ठोऽध्यायः ॥६॥ सूतउवाच ॥ अथर्ववित्सुमन्तुश्चशिष्यमध्यापयत्स्वकाम् ॥
संहितांसोपिपथ्यायवेददर्शायचोक्तवान् ॥१॥

ष्येभ्यः ऊचेशेषाः अन्यास्अपियाः प्रसिद्धाः ता आवन्त्यः स्वशिष्येभ्यः ऊचइति ॥७४॥ इतिद्वादशेषष्ठः ॥६॥ सप्तमेऽथर्ववित्तारः पुराण
व्यासनंततः ॥ पुराणलक्षणादीनिफलंभागवतश्रुतेः ॥ क्रमप्राप्तमथर्ववेदविभागमाह ॥ शिष्यंकबन्धनामानंस्वस्वकांस्वकीयां
संहितां ॥ सोपिशिष्याभ्यांतांद्विधाविभज्यतदुक्तंवैसवे ॥ अथर्ववेदंसमुनिः सुमन्तुरमितद्युतिः ॥ शिष्यमध्यापयामासकव
न्धंसोपितांद्विधाकृत्वातुवेददर्शायतथापथ्यायदत्तवानिति ॥२॥

पंचदशशाखायाः शतैरपरिमितैर्ब्र्यजुर्भिरकरोत् । सतैरिति पाठे एषसयाज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति । जगृहुरधीतवंतः
रविणा अश्वरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्ताः त्यक्ताः शाखाः वाजसनीसंज्ञास्ताः शाखा इति वा ॥६९॥
सामशाखाविभागमाह । जैमिनेरिति । तत्सुतः सुमन्तुसुतः । ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥७०॥ तच्छिष्यः

यजुर्भिरकरोच्छाखा दशपंचशतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ॥६९॥
जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनिः ॥ सुमन्तोस्तु तत्सुतस्ताभ्यामेकैकां प्राह
संहिताम् ॥ सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां
ततो द्विज ॥७०॥ हिरण्यनाभः कौशल्यः पौष्यंजिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवन्त्यो

जैमिनेश्शिष्यः । महान् अतिमेधावी सहस्रसंहितारूपं भेदं चक्रे । साम्नां तं संहिताभेदम् ततस्तदनन्तरम् । सुकर्मणः शि
ष्यः एकः कौशल्यो हिरण्यनाभः । पौष्यंजिर्नामैकः । तौ जगृहतुः । आवन्त्यश्चान्यः तस्यैव शिष्यः सोपि जग्राह ॥७१॥ ॥ ० ॥

इत्यनेन ततः संहिता १

॥भा.द्वा.॥ ॥२९॥

रामशिष्योः कृतव्रणः ॥ एवं चत्वारो वयं मूलसंहिता बाहुल्यं सूचितम् ॥६॥ शुकपरीक्षित्संवादे निरूपितमपि पुराणल
क्षणं महदल्पकथनाय दर्शयति पुराणेति ॥७॥ अस्य विश्वस्य ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वन्तरे
शानुकथा निरोधो मुक्तिराश्रय इत्यत्रोक्तं स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते ॥ अन्तराणि मन्वन्तराणि ॥ वंशो वंशा
नुचरितमिति ईशानुकथाः संस्था निरोधः ॥ अनेनैवात्यन्तिकलयरूपा मुक्तिरप्युक्ता ॥ हेतुशब्देन जीवाश्रयवासना

कश्यपोऽहं च सावर्णी रामशिष्योः कृतव्रणः ॥ अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः
॥६॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम् ॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥
सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ॥ वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥ दशभि
र्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥७॥८॥९॥

शास्त्रवाक्यात्तयोर्गृहीताः ॥८॥ दशभिरेतैर्लक्षणैर्युक्तं महापुराणं विदुः ॥ केचित्पञ्चविधम् ॥ सर्गश्च प्रतिसर्गश्च वंशो
मन्वन्तराणि च ॥ वंशानुचरितं चेति पुराणं पञ्चलक्षणमिति ॥ महत्पुराणमल्पं चेति व्यवस्थाया यत्र दशापि लक्षणा
नि पृथक् निरूप्यन्ते तन्महापुराणम् ॥ यत्र त्वन्येषां पञ्चस्वेवान्तर्भावस्य विवक्षा तदल्पमिति व्यवस्थायेत्यर्थः ॥९॥

॥२९॥

तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास ॥ पथ्यश्च त्रिधा विभज्य त्रीनिति सार्द्धेनाह ॥ शौल्काय
निरिति ॥ २ ॥ अंगिरसः शुनकस्य शिष्यो बभ्रुः सैन्धवायनश्च ॥ तदुक्तं शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ॥ द्वितीयां सं
हितां प्रादात्सैन्धवायनसंज्ञिने इति ॥ सावर्णाद्याः सैन्धवायनादीनां शिष्याः ॥ नक्षत्रकल्पः ॥ शान्तिकल्पश्चेति तदुक्तं

शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु
कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् ॥ २ ॥ बभ्रुः शिष्योऽथांगिरसः सैन्धवायन एव
च ॥ अधीयेतां संहिते द्वे सावर्णाद्यास्तथापरे ॥ ३ नक्षत्रकल्पः शान्तिश्च कश्यपांगिरसादयः ॥ ३
एते अथर्वणाऽऽचार्याः शृणु पौराणिकान्मुने ॥ ४ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्र
णः ॥ वैशंपायनहारीतौ षड्वै पौराणिका इमे ॥ अधीयन्त व्यासशिष्यात्संहितां मत्पितुर्मु
खात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ५ ॥

नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः शान्तिकल्पश्च पंचम इति ॥ नक्षत्रकल्पादीनां कर्तार
स्तत्तन्नाम्नाभिरुच्यन्ते ॥ ३ । ४ ॥ मत्पितुर्मुखादिति ॥ प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखा
देते त्रय्यारुणाद्यः ॥ एकामेकां संहितामधीयन्त ॥ एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

षड्विधं मन्वन्तरमुच्यते ॥ षड्विधत्वमेवाह मनुरिति ॥ मन्वादयः षडेते वर्गाः ॥ स्वस्वाधिकारेण प्रवर्त्तितेन मन्वंतरमित्यर्थः ॥१४॥
वंशमाह ॥ ब्रह्मणः सकाशात्प्रसूतिर्येषां प्रसूतानामित्यर्थः ॥ तेषामन्वयो वंशः ॥ तेषां वृत्तं ये च तद्वंशधरास्तेषां च वृत्तं वंश्य
नुचरितमुच्यते ॥१५॥ अस्याविश्वस्य स्वभावतो मायातो निष्पन्नस्य ॥ महा ॥ मायातो यश्चतुर्विधो लय इति ॥१६॥ अस्य जग
तः सर्गः सर्गादेर्हेतुर्निमित्तं ॥ जीवः सोऽत्र हेतुरुच्यत इत्यर्थः ॥ तस्य निमित्ततामाह ॥ अविद्यया कर्मकारकः ॥ कर्म्मकर्त्ता जीवा

मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ॥ ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥१४॥ राज्ञां
ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ॥ वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ॥१५॥ नैमि
त्तिकः प्राकृतिको नित्य आत्यंतिको लयः ॥ संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः
हेतुर्जीवोस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं प्राहुरव्याकृतमुतापरे ॥१७॥
व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥१८॥

दृष्टप्रयुक्तत्वाद्विश्वसर्गादेः सतु ॥ तत्र हेतुरित्यर्थः ॥ नन्वनुशयी निमित्तमिति केचित् अव्याकृतमित्यपरे ॥ तत्राह ॥ यमिति
चैतन्यप्राधान्येनानुशयिनमुपाधिप्राधान्यविवक्षया अव्याकृतम् ॥१७॥ अपाश्रयमाह ॥ व्यतिरेकेति जाग्रदादिष्ववस्थासु जी
वतया वर्त्तत इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयान्वयः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म ॥ संसारप्र
तीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥१८॥

सर्गादिलक्षणानिव्याचष्टे । अव्याकृतेत्यादिना । प्रधानस्यगुणानांक्षोभात् योमहान्तस्मात्त्रिवृदहंकारस्तस्मात् । भूत
मात्राणांसूक्ष्माणामिंद्रियाणांचतदर्थानांस्थूलानांचतत्तद्देवतानांचसंभवःसर्गःकारणसृष्टिःसर्गइत्यर्थः । उच्यते
इति यथापेक्षमुत्तरत्राप्यनुषंगः ॥१०॥ विसर्गंव्याचष्टे पुरुषेश्वरेणानुगृहीतानामेतेषांमहदादीनांपूर्वकर्मवासनाप्र
धानोयंसमाहारः । कार्यभूतश्चराचरप्राणिरूपोबीजाद्बीजमिवप्रवाहापन्नोविसर्गउच्यतइत्यर्थः ॥११॥ चराणांभूतानांसा

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोहमः । भूतमात्रेंद्रियार्थानांसंभवःसर्गउच्यते ॥१०॥ पुरु
षानुगृहीतानामेतेषांवासनामयः । विसर्गोयंसमाहारोबीजाद्बीजंचराचरम् ॥११॥ वृत्ति
र्भूतानिभूतानांचराणामचराणिच । कृतास्वेननृणांतत्रकामाच्चोदनयापिवा ॥१२॥
रक्षाच्युतावतारेहाविश्वस्यानुयुगेयुगे । तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः ॥१३॥

मान्यतोऽचराणिचकारात्चराणिचकामाद्वृत्तिः । तत्रतुनृणांस्वेनस्वभावेनकामात् । चोदनयापिवायानियतावृत्तिः
जीविकाकृतासावृत्तिरुच्यतइत्यर्थः ॥१२॥ तिर्यङ्मर्त्यर्षिदेवेषुयेऽच्युतावतारास्तेषांयाईहालीलासाविश्वस्यरक्षोच्यत
इत्यर्थः । यैरवतारैरितिसमासात्त्रिकृष्यकथंचित्संबन्धः । त्रयीद्विषोदैत्याः ॥१३॥ ॥ ऽऽ ॥ + ॥ ॰ ॥ ऽऽ ॥

उपसंहरति ॥ब्रह्मन्निति॥ मुनेर्व्यासस्य शिष्यादीनां ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्द्धनं श्रोतॄणामिति शेषः॥२४॥ इति द्वादशे सप्तमः॥७॥ अथाष्टमे तु तपश्चर्य्या मार्कंडेयस्य मोहकैः॥ कामादिभिरसंमोहो नरनारायणस्तुतिः॥ पुराणविभागप्रसंगेन पुराणकर्त्तॄमार्कंडेयस्य चरितं प्रस्तुतमाह सूतेति॥ त्वमेव वक्तुं योग्य इत्याह॥ त्वमेव वक्तुं योग्य इत्याह॥ तमसि संसारे भ्रमतां पा

ब्रह्मन्नेतत्समाख्यातं शाखाप्रणयनं मुनेः॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्द्धन
म्॥२४॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे वेद
शाखाप्रणयनं सप्तमोऽध्यायः॥७॥ शौनक उवाच॥ सूत जीव चिरं साधो वद नो वदतां वर
तमस्यपारे भ्रमतां नॄणां त्वं पारदर्शनः॥१॥ आहुश्चिरायुषमृषिं मृकंडुतनयं जनाः यः क
ल्पांते उर्वरितो येन ग्रस्तमिदं जगत्॥२॥ स वा अस्मत्कुलोत्पन्नः कुलेऽस्मिन्भार्गवर्षभः नैवा
धुनापि भूतानां संप्लवः कोऽपि जायते॥३॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल वटपत्रपुटे तो कं शयानं त्वेकमद्भुतं

रदर्शनस्तन्निवर्त्तकः॥१॥ वक्तव्यमाह॥ आहुरिति उर्वरितः॥ अवशिष्टः येन कल्पांते न॥२॥ तत्कथं घटत इत्येकः प्रश्नः॥२॥ प्रलयाभा
वाद्यो तत्र घटत इत्याह॥ स वा इति॥ यतो भार्गवर्षभः कोपि प्राकृतिको नैमित्तिको वा॥३॥ अन्यदप्यघटितमेवेत्याह॥ एक एवेति तो कं वालकम्

तदेव सदृष्टांतं ॥ प्रपंचयति ॥ पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतमन्वितं ॥ अयुतं च ॥ वहिरप्यवस्थानात् रूपनामसु च त
न्मात्रं सत्तामात्रं यथा ॥ एवं बीजं गर्भाधानमादिर्यासां पञ्चता अन्तो यासां तासु देहावस्थासु नवस्वपि आधिष्ठानत्वेन साक्षि
त्वेन च युतमयुतं च यत्तदपाश्रय इति ॥१९॥ एवं दशापि लक्षणानि व्याख्याय वरीयन्ति महार्भशते ॥ यदुक्तं तदाह विरमेतेति

पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु ॥ बीजादिपंचतान्तासु ह्यवस्थासु युतायुतम् ॥१९॥
विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम् ॥ योगेन वा तदात्मानं वेदेहाया निवर्तते ॥२०॥ ए
वं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च ॥२१॥
ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम् ॥ नारदीयं भागवतमाग्नेयं स्कंदसंज्ञितम् ॥२२॥ भ
विष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनम् ॥ वाराहं मात्स्यं कौर्म्यं च ब्रह्माण्डाख्यमिति त्रिषट् ॥२३॥

यदा सर्गादीनां मायामयत्वानुसंधानेन वामदेवादेरिव स्वयमेव चित्तं विरमेत् ॥ इहैवानुष्ठितेन योगेन वा देवहूत्यादिव
त् ॥ तदा विशेषाभावात् तदात्मानं वेद ततश्चाऽविद्यानिवृत्तेरीहायाः ॥ संसाररूपाया निवर्तत इत्यर्थः ॥२०॥ पुराणविभागप्र
स्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रस्तुतमाह ॥ एवंविधैर्लक्षणैर्लक्ष्याणि ॥२१॥ त्रिषट् अष्टादश ॥२२॥२३॥

भा॰द्वा॰ ॥ ॥७ तेनमृत्युजयेन ८ ध्वस्ताः क्लेशारागादयोयस्यतेनांतरात्मनाप्रत्याहृतेनमनसा ९ ॥ १० तस्यतपोनिष्ठामितिहासेन

॥३२॥ तपःस्वाध्यायपरोवर्षाणामयुतायुतम् ॥ आराधयन्हृषीकेशंजिग्येमृत्युंसुदुर्जयम्
ब्रह्माभृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे ॥ नृदेवपितृभूतानितेनासन्नतिविस्मिताः ॥८॥ इ
त्थंबृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजंयोगीध्वस्तक्लेशान्तरात्मना ॥९॥
तस्यैवंयुञ्जतश्चित्तंमहायोगेनयोगिनः ॥ व्यतीयायमहान्कालोमन्वन्तरषडात्मकः
॥१०॥ एतत्पुरंदरोज्ञात्वासप्तमेऽस्मिन्किलान्तरे ॥ तपोविशंकितोब्रह्मन्नारेभेतद्विघातनम् ॥
॥११॥ गंधर्वाप्सरसःकामंवसन्तमलयानिलौ ॥ मुनयेप्रेषयामासरजस्तोकमदौतथा ॥१२॥
तेवैतदाश्रमंजग्मुर्हिमाद्रेःपार्श्वउत्तरे ॥ पुष्पभद्रानदीयत्रचित्राख्याचशिलाविभो ॥१३॥
वर्णोऽस्मिन्सप्तमेवमन्वंतरेतपसामत्पदंग्रहीष्यतीतिविशंकितः ॥११॥ मुनयेतंभ्रंशयितुंस्मरंजसस्तोकंअतिप्रियमपत्यंलोभःस्मर
यति एतदित्यादिनाअ १ ॥ ॥३२॥

२४

कौतूहलमौत्सुक्यं ॥ तं संशयं न केवलं त्वं योगी विष्णुपुराणेष्वपि ख्यातस्तेन संमतः ॥ ५ ॥ प्रश्नमभिनन्दति ॥ हे महर्षे ॥ अयं प्रश्नः ।
तत्र हेतुः ॥ नारायणेति ॥ यत्र प्रश्नविषये ॥ ६ ॥ तत्र मार्कण्डेयस्तपसा भगवन्तमाराध्य मायाप्रदर्शनं यवे ॥ ततश्च मे नैव भगवन्मा
ययासन्नकल्पा दृष्टा नान्यैः ॥ इत्युत्तरं वक्तु मादित आरभ्य तस्य चरितमाह ॥ प्राप्तेत्यादिना मार्कण्डेयो मृत्युं जिग्य इति पंचमश्लो

एष नः संशयो भूयान्सूत कौतूहलं मतः ॥ तं नश्छिन्द्धि महायोगी पुराणेष्वपि संमतः ॥ ५ ॥ सूत उवा
च ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्त
द्विजातिसंस्कारो मार्कण्डेयः पितुः क्रमात् ॥ छन्दांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्र
तधरः शान्तो जटिलो वल्कलाम्बरः ॥ बिभ्रत्कमण्डलुं दण्डमुपवीतं समेखलम् ॥ कृष्णाजिनं सा
क्षसूत्रं कुशांश्च नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिम् ॥ ८ ॥ सायं प्रातः स
गुरवे भैक्ष्यमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ ९ ॥ ० ॥ ११ ॥

केनान्वयः ॥ मध्यमग्रन्थेन तस्य धर्मः कथ्यते ॥ प्राप्तो द्विजातिसंस्कार उपनयनाख्यो येन सः ॥ पितुः सकाशात् गर्भाधानादिक्रमात् ॥
छन्दांसि वेदान् ॥ ७ ॥ ब्रह्मद्व्रतधरो नैष्ठिकब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये ॥ अग्न्यादिषु पंचसु हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुर्वर्थमा

दुराधर्षमभिभवितुमशकाम् ॥१७॥१८॥ शोषणादीपनसंमोहनतापनमादनाख्यानि पंच सुखानि यस्य तदस्त्रं संदधे नैदेव
मधुर्वसंतः ॥ रजस्तोकस्त्रपुंस्त्वमार्षम् ॥ अन्ये चेंद्रभृत्यास्तस्य मनोभ्यकंपयत् ॥१९॥ किंच ॥ वायुर्मलयानिलः ॥ पुंजिकस्था

दृष्ट्वाग्रे समुपासीनं ददृशुः शक्रकिंकराः ॥ मिलितानासं दुराधर्षं मूर्त्तिमंतमिवानलम् ॥१७॥
नन्नृतुस्तस्य पुरतः स्त्रियो योगायकाजगुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं ॥१८॥ संदधे
स्त्रं स्वधनुषि कामः पंचमुखं तदा ॥ मधुर्मनोरजस्तोकइंद्रभृत्या व्यकंपयन् ॥१९॥ क्रीडंत्याः
पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ इतस्त
तो भ्रमदृष्टेश्चलंत्या अनु कंदुकम् ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् ॥२०॥ विसस
र्जतदा वाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥२१॥ त इत्थ
मपकुर्वंतो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥२२॥ इतींद्रानु
चरैर्ब्रह्मन् धर्षितोपि महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सु च ॥२३॥ ०॥

स्थ्याः तत्सूक्ष्मं वासो जहार ॥२०॥ सर्वे तेषां कर्म तत्र तस्मिन्मोघं व्यर्थं ॥ अनीशस्य निर्दैवस्य ॥२१॥ मुनेरपकुर्वंतः प्रतीकूलमाचरन्तः हेमु

न्तः ॥ [illegible] ॥२२॥

तदाश्रमपदं प्रविवेशे वायुर्ववावितितरतो येनान्वयः ॥ पुराणैर्द्रुमैर्लताभिश्चाञ्चितं पूजितम् पुराणद्विजानामश्वीयांकुलैराकी
र्णम् ॥ पुराणा अत्यमला जलाशया यस्मिन् ॥ मत्तभ्रमराणां संगीतं यस्मिन् ॥ मत्तानां कोकिलानां कूजितं यस्मिन् ॥ मत्तब
र्हिणामेव नर्तनेषु मारोपो संभ्रमो यस्मिन् ॥ मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तम् ॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन्
वायुर्मलयानिलो ववौ प्रससार उत्तंभयन् उद्दीपयन् ॥ तत्र वृक्षेषु प्रवेशान्माद्यं ॥ हिमनिर्झरकराणां दाना च्छैत्यं पुष्पपरिष्वं

तदाश्रमपदं पुराणं पुराणद्रुमलताञ्चितम् ॥ पुराणद्विजकुलाकीर्णं पुराणामलजलाशय
म् ॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितम् ॥ मत्तबर्हिनटारोपं मत्तद्विजकुलाकुलम् ॥ वा
युः प्रविश्य आदाय हिमनिर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तंभयन् स्मरम् ॥ १४ ॥
उद्यच्चन्द्रं निशावक्त्रैः प्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ १५ ॥
अन्वीयमानो गंधर्वैर्गीतवादित्रयूथकैः ॥ अदृश्यताश्चचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ १६ ॥

गात्सौगंधं चोक्तं ॥ १४ ॥ किंच ॥ उद्यन्चन्द्रो यस्मिंस्तन्निशावक्त्रं रजनीमुखं यस्मिन् सः ॥ प्रवालस्तबकानामालयः श्रेणयो ये
षु तैः ॥ गच्छन्ति विटपैः संश्लिष्यन्तीति गोपाद्रुमाः लताश्च तेषां जालैः समूहैः ॥ आविर्बभूव ॥ १५ ॥ किंच ॥ तदा गीतवादित्रा
यूथके गायकादिसमुदायैर्भिर्गन्धर्वैरन्वीयमानः तया स्वःस्त्रियोऽप्सरसस्तासां यूथपतिः ॥ आत्तं चापमिषुश्च येन स

आश्लिषन् ॥ आश्लिष्यन् आलिंगन्निव ॥२९॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण ॥३०॥ पादावानम्य गरिष्ठौ सज्जन
नौ तौ प्रति ॥३१॥ अन्तर्यामिरूपस्तस्यैव प्रवर्त्तकता तादात्म्येन तत्तत्तुल्यता वस्वातंत्र्यं पश्यन्नाह किमिति हेतिगेन वत्वां किमहं वर्ण
ये कथं स्तौमि ॥ यतः येन त्वयैव उदीरितः प्रेरितोऽसुः प्राणः संस्पन्दते प्रवर्त्तते ॥ तमसुमनु च वागादयः स्पंदन्ति ॥ अत्र हेतुर्वे अ

उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥२९॥
तयोरासनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥३०॥ सुखमा
सन आसीनौ प्रसादाभिमखौ मुनिः ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥३१॥ मार्क
ण्डेय उवाच ॥ किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मनइन्द्रियाणि ॥ स्प
न्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भाववन्धुः ॥३२॥ ॥ ० ॥

न्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्प्रसिद्धमित्यर्थः ॥ न केवलं प्राकृतानां तनुभृतां किंतु अजशर्व
योश्च ॥ अतः स्वस्य ममापि तथैव एवं यद्यपि न कश्चिदधिकस्यापि स्वातंत्र्यं अथापि राहयंत्रवत्स्वतंत्रस्तैरपि वागादिभि
भजतां पुंसां भाववंधुः ॥ आत्मबन्धुरसि न तु पित्रादिवद्देहमात्रबंधुः ॥ अहो कृपालुता तवेत्यर्थः ॥३२॥ ॥ ० ॥ ३३ ॥ ॥

निस्तेजसम्म्लानवदनम् ॥ स्वराडिंद्रः २४ नरनारायणरूपो हरिः २५ तावनुवर्णयति द्वाभ्याम् ॥ रौरवं कृष्णाजिनं वल्कलं चांबरं य
योस्तौ ॥ पवित्रे पाणौ ययोस्तौ ॥ त्रिवृत् त्रिगुणान्नवतंतुकमिति वा ॥ त्रिवृद्बहिः पवमानाः ॥ त्रिवृद्बहिष्पंचमानामित्यादौ नवतंतो
र्दृष्टम् ॥ वेदं च दर्भमुष्टिम् ॥ किं च साक्षात्तपएव तौ ॥ तत्र हेतुः तपत्तडिद्वर्णौ दीप्यमानविद्युत्संकाशौ यत्पिशंगरोचिस्तेन ॥

दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्स्मरन् २४
तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः २५ तौ
शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्क
मंडलुं दंडमृजुं च वैणवम् ॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्त
डिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ २६ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृ
ना १ ष्ट्वोत्थायादरेणोच्चैर्नेमांगेन दंडवत् सतत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न से

रूपिणौ मूर्तिमन्तौ ॥ तपत्तडित्तेजो युक्तमूर्त्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः ॥ प्रांशू उन्नतौ २६ उच्चैर्महता आदरेण २७ त
योः संदर्शनेन य आनंदस्तेन निर्वृता उपशान्ता आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य सः ॥ न सेहे नाशक्नोति २८ ॥ ॥ २८ ॥

॥ भा॰ द्वा॰ ॥ यतोऽन्यः पुरुषार्थो नास्तीत्याह ॥ नान्यमिति अं घ्युपनयात् श्रीमच्चरणप्राप्तेरन्यं क्षेमं न विद्मः ॥ परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य ॥ तदेवाह ॥ द्विपरार्द्धं धिष्ण्यं स्थानं यस्य सः ब्रह्मापि ते कालस्य तड्ड ॥ विज्रंभरूपात् कालादलं विभेति अतः किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥ २ तस्मादेवं तस्मात्तव पादमूलं भजामि कथंभूतस्य ऋतधियः ॥ सत्यज्ञानस्वरूपस्य ॥ यद्वा ॥ ऋतासत्या धीर्यस्य यस्मिन्वा तस्य आत्मगुरोर्जीवस्य नियन्तुः

॥ ३५ ॥

नान्यं तवाङ्घ्र्युपनयादपवर्गमूर्त्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ॥ ब्रह्मा विभेत्य
लमतो द्विपरार्द्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानाम् ॥ २ तद्वै भजाम्यृ
तधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहाद्यपार्थमसदंत्य
मभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थम् ॥ ३४ ॥

अतः कारणात्परस्य ॥ किं कृत्वा ॥ आत्मच्छदि स्वात्मावरकम् ॥ अपार्थं च निष्फलम् असच्च तुच्छम् ॥ अन्त्यं च नश्वरम् इदं देहादि हित्वा देहादिभजनं त्यक्त्वा ॥ असच्चेत्कथं प्रतीयते तत्राह ॥ अभिज्ञमात्रम् न हि तत्त्वतः सत् ॥ किंत्वात्ममात्रम् ॥ ननु ततः पृथगस्तीत्यर्थः ॥ नन्वपवर्गाय भवतु मद्भजनम् फलान्तरार्थं त्वन्यभजनं कार्यमेव तत्राह ॥ तर्हीति ॥ यदि वा भजतेऽपु
रुषः तर्हि ते त्वत्त एव सर्वं मनीषितमर्थं विन्देतेति ॥ ३४ ॥

ऽननुकथमावां प्राणादिप्रवर्त्तकौ धर्मपुत्रत्वादावयोरिति चेत्तत्राह॥ मूर्त्तीरिति हेभगवन्भगवतस्तवइमेमूर्त्तीस्त्रिलोक्याः
क्षेमाय पालनाय॥ तापविरमाय दुःखनिवृत्त्यै॥ मृत्युजित्यैमोक्षायच॥ ननु त्वंकस्यापिपुत्र इत्यर्थः॥ अत्रदृष्टान्तः॥ यथेदं
विश्वमवितुं अन्यास्तनूर्मत्स्यकूर्मादिलक्षणाः॥ नाना अनेकप्रकारा बिभर्षितद्वत्॥ नकेवलंपालनादिमात्रंतवकर्म
किन्तु सृष्टिलयावपीत्याह सृष्ट्वेति॥ तत्राऽप्यन्यनिरपेक्षत्वे दृष्टान्तः कर्णनाभिरिवेति॥२३॥ यस्मादेवंभूतस्त्वंतस्मात्त्वांः

मूर्त्तीरिमेभगवतोभगवंस्त्रिलोक्याः क्षेमायतापविरमायचमृत्युजित्यै॥ नानाविभ
र्ष्यवितुमन्यतनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णनाभिः॥२३॥ तस्याऽवितुः
स्थिरचरेशितुरंघ्रिमूलंयत्स्थंनकर्म्मगुणकालरजः स्पृशन्ति॥ यद्वैस्तुवन्तिनिन
मन्तियजन्त्यभीक्ष्णंध्यायन्तिवेदहृदयामुनयस्तदाप्त्यै॥ १॥ ॥०॥ ऽऽ॥ ऽऽ॥

घ्रिमूलं भजामीत्याह तस्येति तस्याऽवितुः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति॥ तृतीयश्लोकस्यानुषंगः
कथंभूतमंघ्रिमूलम् यत्स्थं यत्रस्थितंकर्म्मगुणकालानांरजोमलं॥ अन्येचपूर्वोक्तास्तापादयोनस्पृशन्ति रजइतिवा
पाठः यतः वेदाहृदयेयेषांतेवेदतात्पर्यविदोमुनयः॥ यद्वैस्तुवन्तिनितरांनमन्तितत्॥ तत्प्राप्तयेएवंस्तवनादिकुर्वन्ति॥

वेदार्थसंप्रदायप्रवर्तनेहेतुंत्वंवदन्स्तौतियमिति॥कुपथैरिन्द्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः॥पुमान्स्वेंद्रियादिषुनियंतृत्वे
नसन्तमपियंत्वांनवेद दृक्पथेषुविषयेषुच॥बुद्धिविक्षेपेहेतुः॥तन्माययातस्यतवैवमायया आवृता आत्मनिष्ठा
मतिर्यस्यसउसोऽपिआद्यएवब्रह्मैवमज्ञातेव अखिलगुरोस्तवत्वत्प्रवर्तितंवेदमुपसाद्यप्राप्यतंत्वांसाक्षाद्वेद॥४८॥वेदे

यंवैनवेदवितथाक्षपथैर्भ्रमद्धीःसन्तंस्वखेष्वसुषुहृद्यपिदृक्पथेषु॥तन्माययावृतमतिः
सउएवसाक्षादाद्यस्तवेऽखिलगुरोरुपसाद्यवेदम्॥यद्दर्शनंनिगमआत्मरहःप्रकाशंमु
ह्यंतियत्रकवयोऽजपरायतंतः॥तंसर्ववादविषयप्रतिरूपशीलंवन्देमहापुरुषमात्म
निगूढबोधम्॥४९॥इतिश्रीमद्भागवतेमहापुराणेद्वादस्कंधेमार्कंडेयोपाख्यानेनारायण
स्तवोनामाष्टमोध्यायः॥८॥

वेदेनैवतज्ज्ञानमित्युपपादयन्प्रणमति॥यस्यतवदर्शनंनिगमेभवति॥कथंभूतम्॥आत्मनस्तवरहस्यस्यप्रकाशकम्॥अ
न्यथादुर्ज्ञेयतामाह अजपराब्रह्ममुख्याः कवयोऽपिसांख्ययोगादिभिर्यतमानायत्रत्वयिमुह्यन्ति॥कुतइत्यत
आह॥सर्वेषांसांख्यादिवादानांविषयाभेदाद्यस्तेषांप्रतिरूपंतत्तदनुसारिशीलंस्वभावोयस्यतम्॥कुतः॥आत्मना
देहादिसंघातेननिगूढोबोधोयस्यतम्॥एवंभूतंमहापुरुषंत्वांवन्दे॥४९॥इतिश्रीमद्भागवतेद्वादशेअष्टमोऽध्यायः॥८॥

मनुत्रलरुद्रावपि ममैव मूर्त्ती ॥ अतो मामेव किमर्थं नमाद्रियसे ॥ तत्राह ॥ सत्त्वमिति यदपि यद्यपि तवैव मायाकृता ए
ता लीलाः त्वयैव धृताः ॥ तथापि या सत्त्वमयी सैव प्रशान्त्यै मोक्षाय ॥ न केवलं अस्य प्रशान्त्यभावमात्रमन्यभजने दुः
खनिर्बंध किंचिदन्यथा त्वभवेदित्याह ॥ व्यसनेति ॥ ४५ ॥ तदेव सदाचारेण द्रढयति ॥ तस्मादिति ॥ हे भगवन् तव शुक्लां त
नुं श्रीनारायणाख्यां ॥ अथ तावकानां च शुक्लां तनुं नराख्याम् ॥ यद्यस्मात् सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपमुश

सत्त्वं रजस्तम इतीश तवात्मबन्धो मायामयाः स्थितिलयोदयहेतवोऽस्य ॥ लीलाधृता य
दपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याभ्याम् ॥ ४५ ॥ तस्मात्तवेह भगवन्न
थ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ॥ यत्सात्वताः पुरुषरूपमुशन्ति सत्त्वं लो
को यतोऽभयमुतात्मसुखं न चान्यत् ॥ ४६ ॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगु
रवे परदेवताये ॥ नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥

न्ति मन्यन्ते न तु अन्यत् रजस्तमश्चेति ॥ अत्र हेतुः ॥ यतः सत्त्वात् लोको वैकुण्ठाख्यः लोकत्वे सत्यप्यभयं च ॥ भोगे च सत्यप्या
त्मसुखं च ॥ ४६ ॥ अतस्त्वं प्रणमति तस्मै नम इति ॥ हंसाय शुद्धाय संयतगिरे नियतवाचे ॥ अथ च निगमेश्वराय वेदमार्ग
प्रवर्त्तकाय ॥ ४७ ॥

द्रक्ष्ये द्रष्टुमिच्छामि ॥ लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनः सद्भिदां सति वस्तुनि भेदं पश्यति ६ तथेति द्रक्ष्यसीति सस्मि
तः स्मयन्प्रागात् ॥ पाठान्तरे क्रियाविशेषणं ७ तमेवार्थं मायादर्शनरूपम् अग्न्यादिमूर्तिषु भावद्रव्यैर्मनोमयैर्द्रव्यैः ८

अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदाम् ॥ ६ ॥
सूत उवाच ॥ इतीडितोऽर्चितः कामम् ऋषिणा भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्बदर्याश्रमम् ई-
श्वरः ७ ॥ तमेव चिंतयन्नर्थम् ऋषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥ ८
ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ॥ ९ ॥ तस्यैकदा भृ-
गुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान् ॥ १० ॥ तं चण्डशब्दं
समुदीरयन्तं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनन्त उच्चैरभिव

क्वचित्कदाचित् प्रेमप्रसरसंप्लुतः प्रेमोद्रेकं प्राप्तः ९ मायादर्शनमाह ॥ तस्येत्यादिना ॥ १० ॥ तं वायुमनु बलाहका मेघा अभव
न् आविर्बभूवुः ते च तडिद्भिः सहिता उच्चैः स्वनन्तो गर्जन्तः ॥ अक्षो रथाङ्गं तद्वत्स्थविष्ठाः अभितो वर्षधारा मुमुचुः ११

नवमेभगवानमायारिदृक्षोर्दर्शयन्मुहुः॥ मायाशिशोर्लयाद्वौचमनेनिर्विशनिर्गमौ॥ भगवतःपरितोषपूर्वकंतदपोसि
तवरदानंकथयितुमाह॥ संस्तुतइत्यादिना॥१॥ आत्मसमाधिनाचित्तैकाग्र्येण॥२॥ वयंतेपरितुष्टाःस्मेतिबहुवचनं॥ सर्व
देवाभिप्रायेण॥ वरदेशादित्येकवचनंतद्वयोरैक्याभिप्रायेण॥ प्रतीच्छग्रहाण॥३॥ वरेणाछन्दयतात्वयाजितंउत्कर्षोदर्शि

सूतउवाच॥ संस्तुतोभगवानित्थंमार्कण्डेयेनधीमता॥ नारायणोनरसखःप्रीतआहभृगूद्वह
म्॥१॥ श्रीभगवानुवाच॥ भोभोब्रह्मर्षिवर्योऽसिसिद्धआत्मसमाधिना॥ मयिभक्त्यानपा
यिन्यातपःस्वाध्यायसंयमैः॥ वयंतेपरितुष्टाःस्मत्वद्बृहद्व्रतचर्यया॥ वरंप्रतीच्छभद्रंतेवर
देशादभीप्सितम्॥३॥ ऋषिरुवाच॥ जितंतेदेवदेवेशप्रपन्नार्तिहराच्युत॥ वरेणैतावतालंनोयद्भ
वान्समदृश्यत॥४॥ गृहीत्वाजादयोयस्यश्रीमत्पादाब्जदर्शनं॥ मनसायोगपक्वेनसभवान्मेऽक्षिगोचरः॥५॥

तः॥ ममतुवराकांक्षानास्तीत्याह॥ वरेणेति॥४॥ यस्यतवश्रीमत्पादाब्जदर्शनंमनसापिगृहीत्वाप्राप्यप्राकृताअ
प्यजादयोभवन्तिसभवान्मेऽक्षिगोचरोजातोऽस्ति॥ किमतःपरंवरेणेत्यर्थः॥५॥ ॥०॥ ३३ ॥ + ॥ ३३ ॥

परिभ्रमेलाइषितोगतोव्याप्रइत्यर्थः॥ इषुसर्पेशाइत्यस्मात्॥ १६॥ अन्योन्यघातिभिः॥ नक्रझषाणामयपरस्परंयुध्यद्भिः॥ १७॥ १८॥
विष्णुमायावृतात्मनइतिसतथादृष्टवानित्यर्थः॥ १९॥ कुकुदिउन्नतप्रदेशे॥ न्यग्रोधपोतंकोमलवटम्॥ २०॥ तस्यैशान

क्षुत्तृड्भ्यांपरीतोमकरैस्तिमिंगिलैरुपद्रुतोवीचिनभस्वताहतः॥ तमस्यपारेपतितोभ्रमन्दि
शोनवेदखंगांचपरिश्रमेषितः॥ १६॥ क्वचिन्मग्नोमहावर्त्तेतरलैस्ताडितःक्वचित्॥ यादो
भिर्भक्ष्यतेक्वापिस्वयमन्योन्यघातिभिः॥ १७॥ क्वचिच्छोकंक्वचिन्मोहंक्वचिद्दुःखंसुखं
भयम्॥ क्वचिन्मृत्युमवाप्नोतिव्याध्यादिभिरुतार्दितः॥ १८॥ अयुतायुतवर्षाणांसहस्राणिश
तानिच॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः॥ १९॥ सकदाचिद्भ्रमंस्तस्मिन्पृथिव्याः
ककुदिद्विजः॥ न्यग्रोधपोतंददृशेफलपल्लवशोभितम्॥ २०॥ प्रागुत्तरस्यांशाखायांतस्यापिददृशे
शिशुम्॥ शयानंपर्णपुटकेग्रसन्तंप्रभयातमः॥ २१॥ महामरकतश्यामंश्रीमद्वदनपंकजम्॥ कंबुग्री
वंमहोरस्कंसुनाशंसुन्दरभ्रुवम्॥ २२॥

दिक्शाखायांशिशुमपि॥ २१॥ श्रीमद्रम्यंवदनपंकजंयस्यतंकंबुवत्॥ त्रिरेखावृताग्रीवायस्यतंमहोरस्कंविशालवक्षसंसुनासंशो
भमानानासायस्यतम्॥ सुन्दरेभ्रुवौयस्यतम्॥ २२॥

चतुर्दिक्षु वर्त्तमानाः समुद्राः समीरवेगेनोर्मयस्तैर्भूतलं ग्रसन्तः ॥ उग्रा नक्रा येषु ॥ महाभया आवर्त्ता येषु ॥ गभीरा घोषा येषु
ते च ते च ते च ॥१२॥ आत्मना सह जरायुजादि चतुर्विधं जगदंतर्बहिश्चोपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रसत् भ
यं प्राप केनोपतापितम् अद्भिः कथंभूताभिः ॥ अतिद्युभिः ॥ अतिक्रांता द्यौर्याभिः रवैश्च सूर्यरश्मिभिः ॥ वायुभिर्वातिशोषकःश

ततोऽदृशन्त चतुः समुद्राः समन्ततः क्ष्मातलमाग्रसन्तः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभया
वर्तगभीरघोषाः ॥१२॥ अंतर्बहिश्चाद्भिरतिद्युभिः रवैः शतह्रदाभीरुपतापितं जगत् ॥ चतुर्विधं
वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥१३॥ तस्यैव मुद्वीक्षत ऊर्मिभीषणः ॥
प्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः
समम् ॥१४॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतम् ॥ स एक
वोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडान्धवत् ॥१५॥

तह्रदाभिश्च विद्युद्भिः ॥ दीर्घमार्षं छन्दोनुसारेण ॥१३॥ प्रभंजनेन घूर्णितं प्रकंपितं वाः उदकं यस्मिन्सः ॥ अप्यधात् छादयामास
समं सह ॥१४॥ सक्ष्मान्तरिक्षं भूम्यंतरिक्षस्थप्राणिसहितम् ॥ सदिवं स्वर्गस्थदेवसहितम् ॥ भागणा ज्योतिर्गुणास्तैः सहितम्

कृत्स्नसोदर्शनं प्रपंचयति ॥ खमित्यादिना ॥ ककुभो दिशः ॥ पुराणि आकरांश्च खेटान् कर्मकग्रामान् ॥ व्रजान् गोकुलानि आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः ॥ नानायुगानि कल्पांश्च कल्पयति तैर्वा कल्प्यत इति ॥ तथा तं कालं च सदिव परमार्थ इवा

खंरोदसी भगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरासुरान् ॥ वनानि देशान्सरितः पुराकरा
न्खेटान्व्रजानाश्रमवर्णवृत्तयः ॥ महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल
कल्पनम् ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितम् ॥ हिमालयं पुष्पव
हां च तां नदीं निजाश्रमं यत्र ऋषीनपश्यत ॥ २५ ॥ विश्वं विपश्यन्श्वसिताच्छिशोर्वै बहिर्निरस्तो
न्यपतल्लयाब्धौ ॥ २६ ॥ तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं ॥ तोकं च तत्प्रे
मसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अ
भ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥ २७ ॥

त्यवभासितं तेनैव ॥ २५ ॥ २६ ॥ वटं च तोकं च वीक्ष्य ॥ तस्य प्रेम्णा सुधातुल्यास्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ॥ अथ तं बालकं ॥ अधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः ॥ कथंभूतम् ॥ नेत्राभ्यां हृदि अधिष्ठितम् ॥ २७ ॥ ॥ श्रीराधे

श्वासैरेजन्तः । कंपमाना अलकास्तैराभातं शोभितम् । कंबुवत् अंतर्वलयेन श्रीर्ययोः तौ कंबुश्रियौ तयोः कर्णयोर्दाडि
मसुखे यस्य तं विद्रुमतुल्याधरभा वा ईषत् शोणायितं सुधातुल्यं स्मितं यस्य तं ॥ ३ ॥ पद्मगर्भवत् । आ ईषत् । अरुणा
पांगौ नेत्रांतौ यस्य तं । हृद्यो हासो यस्मिन् तद्वलोकनं यस्य तं । श्वासैरेजन्त्यश्चलंत्यो वलयास्तिस्रः कुनिम्नरेखाः ता

श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितम्
॥ ३ ॥ पद्मगर्भारुणापांगं हृद्यहासावलोकनम् ॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २१ ॥
चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजम् ॥ मुखे निधाय विप्रेन्द्रो धयन्तं वीक्ष्य विस्मितः ॥ २२ ॥
तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितः
प्रष्टुं पुरः सरं प्रससार बालकं ॥ २३ ॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तः शरीरं मशको य
थाविशत् ॥ तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्यदतीव विस्मितः ॥ २४ ॥ ० ॥ श्रीः

भिः संविग्नाश्चंचला निम्ना गंभीरा नाभिर्यस्मिन् तत् दलवदश्वत्थपत्रसंकाशमुदरं यस्य ॥ २१ ॥ चारवोंगुलयो ययोस्ताभ्यामु
न्नीय आकृष्य धयन्तं पिबंतं ॥ २२ ॥ हृत्पद्मं च विलोचनांबुजे च प्रोत्फुल्लानि तानि यस्य सः ॥ अद्भुतभावं मत्वा आश्चर्यरूपं ते
न शंकितः सन्नपि तं प्रष्टुं पुरः प्रससार समीपं गतः ॥ २३ ॥ अहः इदं जगत् यथा पुरा प्रलयाब्धौ न्यस्तं दृष्ट्वा च अतीव विस्मि

॥भा॰ द्वा॰॥ श्रीनारायणएवस्वमायादर्शनश्रान्तंश्रीशिवरूपेणसान्त्वयामासेत्याह ॥ तमेवमित्यादिना ॥ निभृतात्मानंसमाहितचित्तं रुद्राण्याभवान्या ॥३॥ निभृतानिश्चला आत्मेंद्रियाशयादेहेन्द्रियमनांसियस्यतं ॥ निभृतोदनिश्चलमुदकंझषव्रातश्चयस्मिन्

॥४०॥

सूतउवाच ॥ तमेवंनिभृतात्मानंवृषेणादिविपर्य्यटन् ॥ रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः
॥३॥ अथोमातमृषिंवीक्ष्यगिरिशंसमभाषत ॥ पश्येमंभगवन्विप्रंनिभृतात्मेंद्रियाशयम् ॥ निभृ
तोदझषव्रातोवातापायेयथार्णवः ॥४॥ कुर्वस्यतपसःसाक्षात्संसिद्धिंसिद्धिदोभवान् ॥५॥ श्रीभ
गवानुवाच ॥ नैवेच्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिंपरांभगवतिलब्धवान्पुरुषे
ऽव्यये ॥६॥ अथापिसंवदिष्यामोभवान्येतेनसाधुना ॥ अयंहिपरमोलाभोनृणांसाधुसमाग
मः ॥७॥ इत्युक्त्वातमुपेयायभगवान्ससतांगतिः ॥ ईशानःसर्वविद्यानामीश्वरःसर्वदेहिनाम् ॥
तयोरागमनंसाक्षादीशयोर्जगदात्मनोः ॥ नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच ॥९॥।०॥

सः ॥४॥ संसिद्धिंफलंसाक्षात्कुरुप्रकटीकुरुयतोभवान्सिद्धिदः ॥५॥ आशिषःअभ्युदयलक्षणाः ॥ उतअपिअतोहेतुः भक्तिमिति ॥६॥ सं
वदिष्यामःसंवादंकरिष्यामः ॥७॥ सतांगतित्वेहेतुःईशानइति ॥८॥ रुद्धाधियोऽन्तःकरणस्यवृत्तयोयेनसः ॥९॥ श्रीमद्भाग

॥४०॥

२८

तावत्परिष्वंगलाभात्पूर्वमेव स्वयेत्तस्यांतर्हितो बभूव ॥ तदुपमेव फल्येर्ष्यांतः ॥ अनीशो निर्दैवः तेन निर्मिता ईहा क्रीडा यथेति
३३ ॥ अंतर्हिते भगवति तमनु वटः ॥ सलिलं लोकसंप्लवश्च तिरोधायि अंतर्हितः ॥ स च स्वाश्रम एव यथा पूर्वं स्थित इति ॥ ३४ ॥ इति श्री

तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः ॥ अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥
तमन्वथ वटो ब्रह्मन्सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे भगवन्मायादर्श
नं नाम नवमोऽध्यायः ॥ ९ ॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितम् ॥ वैभवं योगमा
यायास्तमेव शरणं ययौ ॥ १ ॥ ऋषिरुवाच ॥ प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयद हरे ॥ यन्माययापि
विबुधा मुह्यन्ति ज्ञानकाशया ॥ २ ॥

द्वादशे नवमः ॥ ९ ॥ दशमे शिव आगत्य मुनेस्तुष्टो वरानदात् ॥ तेन साकं मतिप्रीत्या समाभाष्यत भाजयम् ॥ १ ॥ ज्ञानकाशया ज्ञा
नवत्प्रकाशमानया ॥ त्वद्भजनं विना विद्वांसोपि यस्य तव मायया ज्ञानिनो वयमित्यहंकारेण मुह्यंतीत्यर्थः ॥ २ ॥ श्री ॥

निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति ॥ नमः शिवाय निर्गुणाय सत्वाय सत्वाधिष्ठात्रे अतएव प्रमृडयतीति तथा तस्मै ॥१६॥ नो
ऽस्मत्तः त्रयः ब्रह्मविष्णुमहेश्वराः ॥ यतस्तेभ्यः ते वयम् ॥१७॥ वरदानादिना भवत्सेवैवास्माभिः क्रियते ॥ न तत्त्वनुग्रहः ॥ जगद्वंद्यत्वात्
भवतामिति ब्राह्मणानस्तौति ॥ ब्राह्मणा इत्यादिना ॥ ये साधवः सदाचाराः शांता मत्सरादिरहिता निःसंगाः ॥ निष्कामाः ॥ न केव

नमः शिवाय शांताय सत्वाय प्रमृडाय च ॥ रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ॥ सूत उवा
च ॥ एवं स्तुतः स भगवान् महादेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥१६॥
श्रीभगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं येषां मर्त्यो यद्विंदते
ऽमृतम् ॥१७॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ॥ एकांतभक्ता अस्मासु निर्वैराः
समदर्शिनः ॥ सलोका लोकपालास्तान्वन्दन्त्यर्चन्त्युपासते ॥ अहं च भगवान्ब्रह्मा स्वयं च
हरिरीश्वरः ॥ न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ॥ नात्मनश्च जनस्यापि तद्युष्मान्वयमी

लं न एव ॥ किंच अहं चेत्यादि ॥१८॥ एकत्वमते हेतुत्तरमाह ॥ नेति अण्वपि अणुमात्रमपि न चक्षते पश्यन्ति ॥ तत्तस्मात् ॥
एवंभूतान् युष्मान् ईमहि भजेम ॥१९॥

॥९॥ न केवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः ॥ कथं प्राप्तम् ॥ सहसा अकस्मादेव हृदि भातम् ॥ कथंभूतं तं तडि
त्पिशंगा जटा धारयतीति तथा ॥ त्रीणि अक्षीणि यस्य तं ॥ शूलादिभिः सहाक्षमालादीन् विभ्राणमित्यन्वयः ॥ अक्षमा

भगवांस्तदभिज्ञाय गिरिशो योगमायया ॥ आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः ॥१०॥ आत्मन्य
पि शिवं प्राप्तं तडित्पिंगजटाधरम् ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्करम् ॥ व्याघ्रचर्मांबरं
शूलधनुरिष्वसिचर्म्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ विभ्राणं सहसाभातं
विचक्ष्य हृदि विस्मितः ॥११॥ किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ नेत्रे उन्मील्य ददृशे
सगणां सोमयागतम् ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥१२॥ तस्मै सपर्य्यां व्य
दधात्सगणाय सहोमया ॥ स्वागतासनपाद्यार्घगन्धस्रग्धूपदीपकैः ॥१३॥ आह चात्मा
नुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत् ॥१४॥ श्रीरोध

लादीनो द्वैदेकां ॥११॥ विस्मयपूर्वकं बहिर्दर्शनमाह ॥ किमिदमिति ॥ सोमया उमया सहागतं रुद्रं ददृशे ॥ ततो ननाम ॥१२॥१३॥

पूर्णकामस्त्वं न किं येन त्वया जगन्निर्वृतं भवतीति ॥१४॥

॥भा॰ वा॰॥ नन्वेतत्स्वप्रभावतिरस्कारकं कथं मया क्रियते तत्राह नेति। एतावता लोकसंग्रहमात्रेण तेन नमनादिभिः। कथंभूतैः स्वमाया
मयी वृत्तिर्येषु तैः। भगवतो माऽपि न तत्त्वानुभावो न प्रदुष्येत। यतः प्रसिद्धस्य मायिनः कुहकं कपटं यथा तथैतानि नम
॥४२॥ नादीनि। अतस्तस्य यथा कुहकेनानुभावो न दुष्यति तद्वत्। न दुष्येतेति पाठे नकारस्य द्व्यावृत्त्या तेनानुषंगः॥२७॥ मायाचेष्टितं

नैतावता भगवतः स्वमायामयवृत्तिभिः। प्रदुष्येतानुभावस्तैर्मायिनः कुहकं यथा॥२७॥
सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः। गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा॥२८॥
तस्मै नमो भगवते त्रिगुणाय गुणात्मने। केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये॥ कं वृणे
नु परं भूमन्वरं त्वद्वरदर्शनात्। यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत्॥२९॥ वरमे
कं वृणेऽथापि पूर्णात्कामाभिवर्षणात्। भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि॥३०॥

प्रपंचयति। सृष्ट्वेति स्वप्नदृग्यथेत्यविद्याचेष्टिते दृष्टान्तः। त्रिगुणात्वेऽपि न जीववत्तदभिभूताय। किंतु गुणानामात्मने
नियंत्रे। वरं वृणीष्वेति यदुक्तं तत्राह किमिति। वरं दर्शनं यस्य तस्मात्त्वत्तः परं कं नु वरं वृणे यस्य तव दर्शनात्पूर्णकामः
सर्वदानन्दसन्दोहरूपः सत्यकामः यथेष्टं प्राप्तसर्वानन्दः॥२९॥३०॥

॥ २० ब्राह्मणेभ्यः ब्राह्मणान् ॥ आत्मसमाधानं चित्तैकाग्र्यम् ॥ तपआलेचनम् ॥ स्वाध्यायोऽध्ययनम् ॥ संयमो वागादिनियमनैः
॥ २१ ॥ किं वश्रवणादित्यादि ॥ २२ ॥ चंद्रोललामो भूषणं यस्य तस्य ॥ धर्म्मरहस्ययुक्तम् ॥ अमृतास्पदं वचः कर्णाभ्यां पिबंता
तृप्यत ॥ अलमिति नामन्यत् कर्णयोरमृतायनमिति वान्वयः ॥ २३ ॥ शिवस्य वागेवामृतं तेन ध्वस्तः ॥ क्लेशपुंजो यस्य

नद्यस्त्वयानि तीर्थानि न देवाश्चेतनोज्झिताः ॥ ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥ २० ॥ ब्राह्म
णेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् ॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥ २१ ॥
श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः ॥ शुद्ध्येरन्नन्त्यजाश्चापि किमु संभाषणादिभिः ॥ २२ ॥
सूत उवाच ॥ इति चंद्रललामस्य धर्मगुह्योपबृंहितम् ॥ वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः
पिबन् ॥ २३ ॥ स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशम् ॥ शिववागमृतध्वस्तक्लेशपुंजस्त
मब्रवीत् ॥ २४ ॥ ऋषिरुवाच ॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमन्तीशितव्यानि स्तु
वन्ति जगदीश्वराः ॥ २५ ॥ धर्म्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरन्त्यनुमोदन्ते क्रियमा

सः ॥ २४ ॥ इयं लीला दुर्विभाव्या अतर्क्या यद्यपाईशितव्यानि स्वनियम्यानि यानि मतानि तानि जगदीश्वराः ॥ स्वयं नम
न्ति स्तुवन्ति चेति ॥ २५ ॥ अथवा लोकसंग्रहमात्रमेतदित्याह ॥ धर्म्ममिति ॥ प्रवक्तारोऽपि स्वयं देहिनां धर्म्ममाचरन्ति ॥ २६ ॥

नन्वेवमप्यस्मत्कुलोत्पन्नस्य सप्तकल्पायुष्ट्वं रुद्रैरुच्यमानं विरुद्धमेवेत्यत आह॥ एतन्मार्कंडेयेनानुभूतं भगवन्मायावैभवं नाना
कल्परूपं कदाचित्कं ईश्वरेच्छया तस्यैवाकस्मिकम्॥ न तु सर्वसाधारणम्॥ एतत्केचिदनादि बहुकालं आवर्तितं देवयुगसहस्र
ह्वयमानेन पुनः पुनः परिवर्तितं प्रचक्षते॥ के ते॥ नृणां संसृतेः॥ सर्गप्रलयादिलक्षणा आत्मनो भगवतो मायेत्येवम[illegible]

एतत्केचिदविद्वांसो मायासंसृतिरात्मनः॥ अनाद्यावर्त्तितं नृणां कदाचित्कं प्रचक्षते॥३६॥
य एवमेतद्भृगुवर्य्य वर्णितं रथांगपाणेरनुभावभावितम्॥ संश्रावयेत्संशृणुयादु ता
वुभौ तयोर्न कर्माशयसंसृतिर्भवेत्॥३७॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां सं
हितायां वैयासिक्यां द्वादशस्कन्धे मार्कंडेयोपाख्यानं दशमो अध्यायः॥१०॥ ॥०॥

विद्वांसः॥ विद्वांसस्तु मायाशिशोः श्वासोच्छ्वासाभ्यां सप्तकृत्वस्तदुदरप्रवेशनिर्गमतः सप्तकल्पत्वं तद्रक्षणमात्रेणेति वदन्ति
अतो न विरोध इत्यर्थः॥३६॥ संशृणुयात्॥ य उ उत्तसंश्रावयेत् यः श्रावुभौ॥ तयोः कर्मवासनाकृता संसृतिर्न भवेदिति॥३७॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे मार्कंडेयोपाख्यानं दशमोऽध्यायः॥१०॥

वरदानायस्वयमेवप्रवृत्तः॥ शर्वयाऽमयाचाभिनंदितः॥ अनुमोदितस्तमाह॥३१॥ कामोयंसर्वोपि अन्यच्चपुराणंयशइ
त्यादि॥ ब्रह्मवर्चस्विनस्तेभूयादित्युत्तरेणान्वयः॥ यस्त्वमधोक्षजेभक्तिमान्॥३२॥ तस्यकर्मेतत्प आदि अमुनापुरानु

सूतउवाच॥ इत्यर्चितोभिष्टुतश्चमुनिनासूक्तयागिरा॥ तमाहभगवान्शर्वः शर्वयाचाभिनन्दितः॥
॥३१॥ कामस्तेऽयंमहर्षेऽस्तुभक्तिमांस्त्वमधोक्षजे॥ आकल्पांताद्यशःपुण्यमजरामरता
तथा॥ ज्ञानंत्रैकालिकंब्रह्मन्विज्ञानंचविरक्तिमत्॥ ब्रह्मवर्चस्विनोभूयात्पुराणाचार्यता
स्तुते॥३२॥ सूतउवाच॥ एवंवरान्समुनयेदत्वागात्त्र्यक्षईश्वरः॥ देव्यैतत्कर्मकथयन्ननुभूतं
पुराऽमुना॥३३॥ सोप्यवाप्तमहायोगमहिमाभार्गवोत्तमः॥ विचरत्यधुनाप्यद्धाहरावेकांतितांग
तः॥३४॥ अनुवर्णितमेतत्तेमार्कंडेयस्यधीमतः॥ अनुभूतंभगवतोमायावैभवमद्भुतम्॥३५॥

भूतंयत्भगवान्मायावैभवंतच्चकथयन्॥३३॥ अवाप्तोमहायोगमहिमायेनसः॥३४॥ एतन्मार्कंडेयस्यचरितंतेनानुभू

॥भा॰ द्वा॰॥
॥४४॥

अंगादिकल्पनां भूरादिभिर्दर्शयितुं प्रथमं तावद्यथा कल्पयन्तीति प्रश्नस्य वैराजरूपेणोत्तरं वक्तुं विराडुत्पत्तिमाह मायाद्यैः
प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्वैः ॥ विकारा एकादशेन्द्रियाणि पंचमहाभूतानीति षोडश ॥ तन्मयो विरा
ट् सः प्रसिद्धो निर्मितः ॥ यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते ॥ अनेनांगादिकल्पनासौलभ्यं दर्शितम् ॥४॥

मायाद्यैर्नवभिस्तत्वैः सविकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयम् ॥४॥ एत
द्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ प्रजा
पतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः ॥ लज्जोत्त
रोधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥ या
वानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो लोकसंस्थया ॥८॥

एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्वरूपमेवेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तत्स्वरूपमुच्यते ॥ अंगकल्पनामाह भूः
पादावित्यादित्रिभिः ॥ भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ प्रजननं मेढ्रम् अपानः पायुः ॥५॥ अनुक्तमन्यदप्ये
वमूह्यमित्याह ॥ यावानयं व्यष्टिपुरुषः स्वमानतः सप्तवितस्तिः ॥ संस्थया अवयवसंनिवेशेन मितः ॥८॥ श्रीमद्राधावल्लभ

एकादशो तु पूजार्थे महापुरुषवर्त्तिनाम् ॥ स्वेच्छेह स्यचारम्यानं प्रतिमासं पृथक् पृथक् ॥ येनामर्त्यत्वमापन्नो मर्त्यो सौ भार्गवोत्तमः
तं पृच्छति क्रियायोगं सांगोपांगादिकल्पितम् ॥ अथेति हे भागवत ॥ यतो भवान्समस्ततंत्रराधान्ततत्त्ववित् ॥ १ ॥ पृष्टमाह
तांत्रिका इति ॥ परिचर्य्यायामुपासनायां विषये ॥ केवलस्य चैतन्यघनस्य अंगानि पादादीनि ॥ उपांगानि गरुडादीनि आ

शौनक उवाच ॥ अथैनमर्थं पृच्छामो भवन्तं बहुवित्तमम् ॥ समस्ततंत्रराद्धान्ते भवान्भा
गवततत्त्ववित् ॥ १ ॥ तांत्रिकाः परिचर्य्यायां केवलस्य श्रियः पतेः ॥ अंगोपांगायुधाकल्पं
कल्पयन्ति यथैव यैः ॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सताम् ॥ येन क्रियानैपुणे
न मर्त्यो यायादमर्त्यताम् ॥ २ ॥ सूत उवाच ॥ नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीर
पि ॥ यां प्रोक्ता वेदतंत्राभ्यामाचार्य्यैः पद्मजादिभिः ॥ ३ ॥

युधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयः ॥ तेषां द्वंद्वैकवम् ॥ तद्यथा कल्पयंति यैश्च तत्त्वैः ॥ कल्पयन्ति तन्नो वर्ण
यति ॥ गुरूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह ॥ नमस्कृत्येति विभूतीः विराड्विग्रहाद्याः ॥ ३ ॥ श्री ॥

मंडुलं देवयजनं देवपूजाभूमिं सत्वं मंडलत्वेन भावयेदित्यर्थः ॥ अंतर्वन्हि मंडुलं वा ॥ दीक्षासंस्कार आत्मनः गुरुकृतां मंत्रदीक्षामेव आ
भा॰ द्वा॰ ॥ त्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः ॥ परिचर्येति ॥ भगवतस्तां परिचर्यां स्वसकलपापक्षयरूपां भावयेदित्यर्थः ॥ १३ ॥ पूर्वं मासन
॥ ४५ ॥ पद्ममुक्तमिदानीं हस्तस्थं पद्ममाह ॥ भगवानिति ॥ भगशब्दार्थं मैश्वर्यादिषाड्गुण्यम् ॥ १४ ॥ हे द्विजाः एकवचनान्तो वा पाठः अ
कुतोभयं कैवल्यं धामगृहम भजत ॥ यद्वा ॥ वैकुंठस्य विशेषणं ॥ अकुतोभयं यद्धामेति ॥ त्रिवृत ऋग्यजुःसामरूपो वेदः सुपर्णो

मंडुलं देवयजनं दीक्षासंस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १३ ॥ भ
गवान्भगशब्दार्थं लीलाकमलमुद्वहन् ॥ धर्मं यशश्च भगवान्चामरव्यजनेऽभजत् ॥
१४ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयम् ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पुरुष
म् ॥ १५ ॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तंत्रमूर्त्तिर्विदितः
पार्षदाधिपः ॥ नंदादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ १६ ॥

सिगरुत्मानत्रिवृत्तेन शिर इत्यादिमंत्रलिंगात ॥ यज्ञं यज्ञस्वरूपं पुरुषम ॥ यज्ञो वै विष्णुरिति श्रुतेः ॥ १५ ॥ अनपायिनी हरेः शक्तिः त
त्रहेतुः साक्षादात्मनः ॥ स्वस्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः ॥ तंत्रमूर्त्तिः पंचरात्राद्यागमरूपः येऽणिमादयोऽष्टौ

भूषणादीन्याह ॥ कौस्तुभेत्यादिना ॥ स्वात्मज्योतिः शुद्धं जीवचैतन्यम् ॥ प्रातस्य कौस्तुभस्य प्रभातामेव श्रीवत्सं विभर्त्ति ॥ ७ ॥
त्रिवृत्स्वरं त्रिमात्रं प्रणवम् ॥ ८ ॥ पारमेष्ठ्यं परं ब्रह्म सत्यलोकम् ॥ ९ ॥ अव्याकृतं प्रधानं ॥ यत्र अधिष्ठितः ॥ अधिष्ठायास्थितः तद

कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभा व्यापिनी साक्षाच्छ्रीवत्समुरसा वि-
भुः ॥ ७ ॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत् ॥ वासश्छन्दोमयं पीतं ब्रह्मसूत्रं
त्रिवृत्स्वरम् ॥ ८ ॥ विभर्त्ति सांख्यं योगं च देवो मकरकुंडले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोका-
भयंकरं ॥ ९ ॥ अव्याकृतमनंताख्यमासनं यदधिष्ठितः ॥ धर्म्मज्ञानादिभिर्युक्तं सत्वं पद्ममि-
होच्यते ॥ १० ॥ ओजः सहोबलयुतं मुख्यतत्वं गदां दधत् ॥ अपांतत्वं दरवरं तेजस्तत्वं सुदर्शनम् ॥
नभोनिभं नभस्तत्वमसिं चर्म तमोमयम् ॥ कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिम् ॥ ११ ॥
इंद्रियाणि शरानाहुराकूतीरस्य स्यन्दनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मताम् ॥ १२ ॥

सन्भृतं पद्मं सत्वगुणो ॥ १० ॥ मुख्यतत्वं प्राणतत्वम् ॥ प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं ॥ ११ ॥ आकूतीः क्रियाशक्तियु-
क्तं मनः अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तं रूपम् ॥ मुद्रया धृतया अर्थक्रियात्मतां वराभयदातृत्वं विभर्त्तीति तत्त्वमु

भा॰टी॰ ॥ यस्येरुपासनसुक्तं तं श्रीकृष्णं प्रार्थयते ॥ कृष्णसख अर्ज्जुनस्य सखे वृष्णिश्रेष्ठ ॥ अवनिध्रुहो ये राजन्यास्तेषां वंशस्य दह
न अनपवर्ग ॥ अक्षीणं वीर्य्यं यस्य गोपवनितानां व्रजाः सम्महाः ॥ भृत्या नारदादयः तैर्गीतं तीर्थभूतं श्रवः कीर्त्तिर्यस्य
॥५६॥ श्रवणमेव मंगलं यस्य ॥ २१ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फलमित्याह ॥ य इति ॥ कल्ये उषःकाले यस्तच्चित्तः प्रयतः

श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंदगोपवनिता
व्रजभृत्यगीततीर्थश्रवःश्रवणमंगलपाहिभृत्यान् ॥ २१ ॥ यइदंकल्यउत्थायमहापुरुषल
क्षणम् ॥ तच्चित्तःप्रयतोजप्त्वाब्रह्मवेदगुहाशयम् ॥ २२ ॥ शौनकउवाच ॥ शुकोयदाहभगवान्
विष्णुरातायशृण्वते ॥ सौरोगणोमासिमासिनानावसतिसप्तकः ॥ तेषांनामानिकर्माणि
संयुक्तानामधीश्वरैः ॥ ब्रूहिनःश्रद्दधानानांव्यूहंसूर्यात्मनोहरेः ॥ २३ ॥

शुनिश्चलमनः सन् जप्त्वा गुहाशयं हृदि ॥ स्थितं ब्रह्म पश्यति ॥ २२ ॥ संतुलं देवयजनमित्युक्त्या बुद्धिमागतः ॥ मूर्त्तिर्व्यूहप्रसंगेन
रविव्यूहोऽत्र पृच्छ्यते ॥ शुक इति ॥ पंचमे यदाह तथाप्येवं च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवाश्चेत्येकैकशो गण
णः सप्तसंख्यादिना सौरः ॥ सूर्यसंबन्धी सप्तानां गणः ॥ तेषां सप्तानामधीश्वरैः ॥ तत्तत्पतिभिः ॥ तत्तन्मासाधिकृतसूर्यैर्वा ॥ व्यू ॥५६॥

तस्यैव चतुर्व्यूहोपासनामाह। वासुदेवादिशब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्त्तिभेदेनोपास्य इत्यभिधीयते ॥१७॥ तस्यैवाध्यात्म
चतुर्व्यूहोपासनमाह स एव भगवान् विश्वादिशब्दैर्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते। तद्धेतुरुपाधीनाह। अर्थो बाह्यः
इन्द्रियं मनः आशयस्तदुभयसंस्कारयुक्तमज्ञानम्। ज्ञानं त्रितयसाक्षित्वं ॥१८॥ उक्तचतुर्व्यूहरूपयोपासनेपि पूर्वोक्तसंगायुपा
सनमाह। अंगेति। अंगादिभिरुपलक्षितो भगवान् हरिर्वासुदेवादिचतुर्मूर्त्तिः। सन् विश्वादिचतुष्टयं बिभर्त्ति स्म विश्वादिभा

वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम्। अनिरुद्ध इति ब्रह्मन् मूर्त्तिव्यूहोभिधीयते ॥१७॥
स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः। अर्थेन्द्रियाशयज्ञानैर्भगवान् परिभाव्यते ॥१८॥
अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयम्। बिभर्त्ति स्म चतुर्मूर्त्तिर्भगवान् हरिरीश्वरः ॥१९॥
द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक्। स्वमहिमपरिपूर्णो मायया च स्वयैतत्। सृज
ति हरति पातीत्याख्यया नावृताक्षो विवृत। इव निरुक्तस्तत्परैरात्मलभ्यः ॥२०॥११॥

वेपि तन्नियन्तृत्वस्य न जीवत्वमित्याह। विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥१९॥ तस्य ब्रह्मादित्रिमूर्त्तितामाह
द्विजऋषभेति स एष भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्रयं वस्तुतो भेदाभावेन तत्स्वगतया मायया सृजति
हरति पातीति कृत्वा। आख्यया ब्रह्मादिरूपया अनावृताक्षो नाच्छन्नज्ञानोपि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः
अत्र विद्वदनुभवं प्रमाणयति यतस्तत्परैरात्मत्वेनोपलभ्यत इति ॥२०॥

तानेवगणान्नाह ॥ धातेतित्रिद्वादशभिः ॥ धातासूर्य्यः कृतस्थलीअप्सराः हेतीराक्षसः ॥ वासुकिर्नागः ॥ रथकृत्तयक्षः ॥ पुलस्त्यऋ
॥ विः तुम्बुरुर्गन्धर्वः ॥ २९ अथौजायक्षः ॥ प्रहेतीराक्षसः ॥ नारदोगन्धर्वः ॥ कच्छनीरोनागः ॥ माधवमवैशाखम् ॥ ३० मित्रःसूर्य्यः ॥

धाताकृतस्थलीहेतिर्वासुकीरथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरितिमधुमासंनयन्त्यमी ॥ २९ ॥
अर्य्यमापुलहोऽथौजाःप्रहेतिःपुंजिकस्थली ॥ नारदःकच्छनीरश्चनयन्त्येतेस्ममाधवम् ॥
॥ ३० ॥ मित्रोऽत्रिःपौरुषेयोऽथतक्षकोमेनकाहहाः ॥ रथस्वनइतिह्येतेशुक्रमासंनयन्त्यमी ॥
वशिष्ठोवरुणोरंभासहजन्यस्तथाहुहूः ॥ शुक्रश्चित्रस्वनश्चैवशुचिमासंनयन्त्यमी ॥ ३१ ॥
इंद्रोविश्वावसुःश्रोताएलापत्रस्तथांऽगिराः ॥ प्रम्लोचाराक्षसोवर्य्योनभोमासंनयन्त्यमी ॥ ३२ ॥

पौरुषेयोराक्षसः रथस्वनोयक्षः ॥ शुक्रमासंज्येष्ठंनयन्त्यनुवर्त्तयन्ति ॥ ३१ ॥ वरुणःसूर्य्यः ॥ सहजन्योयक्षः ॥ शुक्रोनागः ॥ चित्रस्वनोरा
क्षसः ॥ शुचिमासंआषाढम् ॥ ३१ ॥ इंद्रःसूर्यः ॥ विश्वावसुर्गन्धर्वः ॥ श्रोतायक्षः ॥ एलापत्रोनागः ॥ वर्य्योराक्षसइतिस्वयमेवव्याख्या

[illegible]

तत्रतावत्सूर्यं निरूपयितुं प्रथमं सूर्य्यस्वरूपमाह ॥ अनाद्यविद्ययामायया ॥ अयंसूर्य्यः लोकतंत्रः ॥ लोकयात्राप्रवर्त्तकः ॥२४॥
अतस्तस्यक्रियाभेदोपाधिकमेवनानात्वंनस्वतइत्याह ॥ एकएवेति ॥ सूर्य्यआत्माजगतस्तस्थुषश्चेतिश्रुतेर्जगदात्मनाआ
दिकृत्सृष्टिकर्त्ताहरिरेवसूर्य्यः ॥ सचसर्वासांवेदोक्तक्रियाणांमूलंसन् तेनोपाधिनाबहुधोक्तः ॥२५॥ कालरूपधारिणोहरेर्द्वा

सूतउवाच ॥ अनाद्यविद्ययाविष्णोरात्मनःसर्वदेहिनां ॥ निर्मितोलोकतंत्रोयंलोकेषुपरिवर्त्तते ॥
एकएवहिलोकानांसूर्य्यआत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥२५॥ का
लोदेशःक्रियाकर्त्ताकारणंकार्य्यमागमः ॥ द्रव्यंफलमितिब्रह्मन्नवधोक्तोऽजयाहरिः ॥२६॥ म
ध्वादिषुद्वादशसुभगवान्कालरूपधृक् ॥ लोकतंत्रायचरतिपृथग्द्वादशभिर्गणैः ॥२७॥

दशादित्यारूपभेदंक्रियोपाधिकंदर्शयितुंप्रथमंसर्वकर्मप्रवृत्तयेमायाकृतंनवधाभेदमाह ॥ कालइति ॥ कालःप्रातरादिः ॥ दे
शःसमादिः ॥ क्रियाःअनुष्ठानम् ॥ कर्त्ताब्राह्मणादिः ॥ करणंस्रुगादि ॥ आगमोमंत्रादिः ॥ द्रव्यंव्रीह्यादि ॥ फलंस्वर्गादि ॥२६॥ तत्रकाल
रूपधारीभगवान्पृथक्चरतिमध्वादिषुचैत्रादिषु ॥ लोकतंत्रायलोकयात्रानिर्वाहाय ॥२७॥ ११ ॥ ० ॥ + ॥०॥

विस्नुरादित्यः ॥ अश्वतरो नागः ॥ सूर्य्यवर्च्चो गन्धर्वः ॥ सत्यजित् यक्षः ॥ मखापेतो राक्षसः ॥ ऊर्ज्जमासं कार्तिकम् ॥ ४४ ॥ एते चादित्या
दयः कौमेवि भज्योक्ताः ॥ धाता अर्य्यमा च मित्रश्च वरुणश्चेंद्र एव च विवस्वानथ पूषा च पर्ज्जन्यश्चांशुरेव च ॥ भगस्त्वष्टा
च विस्नुश्च आदित्या द्वादश स्मृताः ॥ पुलस्त्यः पुलहश्चात्रिर्वशिष्ठोथांगिरा भृगुः गौतमोथ भरद्वाजः कश्यपः क्र
तुरेव च ॥ जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥ अथ कृच्छ्ररथोजाश्च ग्रामणीश्च रथस्वनः ॥ रथचित्रस्वनः प्रोक्तः अरुणा
सेनजित् तथा ॥ तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित् सत्यजित् तथा ॥ एते यक्षाः अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ॥ वर्यो व्या
घ्रस्तथा युश्च वायुर्विद्युद्दिवाकरः ॥ ब्रह्मापेतश्च विप्रेन्द्रा यज्ञापेतश्च राक्षसाः ॥ वासुकिः कच्छनीरश्च तक्षकः शुक्र एव च ॥ ए

विस्नुरश्वतरो रंभा सूर्य्यवर्च्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्ज्जमासं नयन्त्यमी
॥ ४४ ॥ एता भगवतो विस्नोरादित्यस्य विभूतयः ॥ स्मरतां सन्ध्ययोर्न्नृणां हरन्त्यंहो दिने दिने ॥ ४५ ॥

ला पत्रः शंखपालश्च तथैरावतसंज्ञितः ॥ धनंजयो महापद्मस्तथा कर्कोटको द्विजाः ॥ कंबलोश्वतरश्चैव वहन्त्येवं यथाक्रमम् ॥
तुंबुरुर्न्नारदो हाहा हूहूर्विश्वावसुस्तथा ॥ उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः ॥
सूर्य्यवर्च्चो द्वादशैते गंधर्वा गायतां वराः ॥ कृतस्थल्यप्सरो वर्य्या तथान्या पुंजिकस्थली ॥ मेनका सहजन्या च प्रम्लोचा च
द्विजोत्तमाः ॥ अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा ॥ अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमाः ॥ रंभा चेति द्वि
जश्रेष्ठा तथैवाप्सरसः स्मृता इति ॥ ४५ ॥

विवस्वान्सूर्यः उग्रसेनोगन्धर्वः व्याघ्रोराक्षसः आसारणोयक्षः शंखपालोनागः नभस्याख्यं भाद्रपदं ३३ धनंजयोनागः
वातोराक्षसः सुषेणोगन्धर्वः सुरुचिर्यक्षः तपोमासं माघम् मासक्रमातिलंघनं कौर्गोक्तादिक्रमात्सारेण वैष्णवेतु
मासक्रमेनेवोक्तिः क्वचिन्नामव्यत्ययस्तु कल्पभेदेनेतिज्ञेयम् ३४ ऋभुर्यक्षः वर्चाराक्षसः पर्जन्यः सूर्यः सेनजित
आसुरः विश्वोगन्धर्वः ऐरावतोनागः तपस्याख्यं फाल्गुनं ३५ अंशुः सूर्यः अंशइतिवापाठः तार्क्ष्योयक्षः ऋतसेनो

विवस्वानुग्रसेनश्च व्याघ्र आसारणोभृगुः ॥ अनुम्लोचाशंखपालोनभस्याख्यंनयन्त्यमी
॥३३॥ पूषाधनंजयोवातः सुषेणः सुरुचिस्तथा ॥ घृताचीगौतमश्चेतितपोमासंनयन्त्यमी ॥३४॥
ऋभुर्वर्चाभरद्वाजः पर्जन्यः सेनजित्तथा ॥ विश्वऐरावतश्चैवतपस्याख्यंनयन्त्यमी ॥३५॥
अथांशुः कश्यपस्तार्क्ष्यऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशंखः सहोमासंनयन्त्यमी ॥
भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्चपंचमः ॥ कर्कोटकः पूर्वचित्तिः पुष्यमासंनयन्त्यमी ॥३७॥
त्वष्टाऋचीकतनयः कंबलाश्वस्तिलोत्तमा ॥ ब्रह्मापेतोऽथशतजिद्धृतराष्ट्रइषंभराः ॥३८॥

गन्धर्वः ॥ विद्युच्छत्रुःराक्षसः ॥ महाशंखोनागः सहोमासं मार्गशीर्षम् ॥ ३६ ॥ भगः सूर्यः स्फूर्जोराक्षसः ॥ अरिष्टनेमिर्गन्धर्वः
ऊर्णोयक्षः आयुऋषिः कर्कोटकोनागः ॥ ३७ ॥ ऋचीकतनयोजमदग्निः कंबलाश्वोनागः ॥ ब्रह्मापेतोराक्षसः ॥ शतजिद्यक्षः
धृतराष्ट्रोगन्धर्वः ॥ इषंभरः ॥ आश्विनपालकाः ॥ ३८ ॥

भा·द्वा· द्वादशेतु पुराणोक्तसर्वार्थानुक्रमः कृतः॥ प्रथमस्कंधमारभ्य प्राधान्येन समासतः॥ तदेवमस्मिन् पुराणे ऽज्ञानर्थान् संक्षेपतो व
र्णयिष्यन्॥ धर्म्मादीनि प्रणमति नम इति॥ महते हरिभक्तिलक्षणाय॥ ब्राह्मणेभ्यो ब्राह्मणान्॥ सनातनान् धर्म्मान् नित्यं पलक्ष
॥४९॥ णे पुराणोक्तार्थान्॥१॥ पुरुषत्वे उचितं श्रवणादियोग्यम्॥२॥ तत्र प्रपंचयति॥ अत्रेति॥ भगवान् ऐश्वर्यादिषड्गुणः साक्षात्से

सूत उवाच॥ नमो धर्म्माय महते नमः कृष्णाय वेधसे॥ ब्राह्मणेभ्यो नमस्कृत्य धर्म्मान्व
क्ष्ये सनातनान्॥१॥ एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतम्॥ भवद्भिर्यदहं पृष्टो नराणां पु
रुषोचितम्॥२॥ अत्र संकीर्त्यते साक्षात्सर्वपापहरो हरिः॥ नारायणो हृषीकेशो भगवान्सा
त्वतांपतिः॥३॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययम्॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसं
युतम्॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयम्॥४॥

कीर्त्यत इति देवताकारणार्थः॥३॥ ब्रह्मकारणार्थमाह॥ अत्र ब्रह्मेति॥ गुह्यं निर्गुणम्॥ प्रभवाप्ययम् प्रभवत्यस्मादिति प्रभवं॥ अ
प्यत्यस्मिन्निति अप्ययं तच्च तच्च॥ अनेनाश्रयशब्दार्थो दर्शितः॥ विज्ञानसंयुतम्॥ अपरोक्षज्ञानपर्यंतं ज्ञानम्॥ तदुपाख्यानं त
ज्ज्ञानमुपाख्यायते प्रकाश्यते येन च तज्ज्ञानसाधनमित्यर्थः॥ भक्तियोगश्च साध्यसाधनरूपः॥ तदाश्रयं भक्तियोगेन नि

॥४९॥ २४

एतेषांपृथक्कर्म्माणिनिरूपयति॥ द्वादशस्वपीतित्रिभिः॥ असौदेवःसूर्य्यः॥ षड्भिर्गन्धर्वादिभिरस्यजनस्यसमन्ताच्चरन्
शुभांमतिंतनुते॥ गायत्र्यर्थोऽनेनसूचितः॥ ४१॥ तल्लिङ्गैःसूर्य्यप्रकाशकैः॥ ४२॥ उन्नह्यन्तिदृढंबध्नन्ति॥ ग्रामण्योयक्षाः

द्वादशस्वपिमासेषुदेवोऽसौषड्भिरस्यवै॥ चरन्समन्तात्तनुतेपरत्रेहचसन्मतिम्॥ ४१॥
सामर्ग्यजुर्भिस्तल्लिङ्गैरृषयःसंस्तुवन्त्यमुम्॥ गन्धर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोऽ
ग्रतः॥ ४२॥ उन्नह्यन्तिरथंनागाग्रामण्योरथयोजकाः॥ चोदयंतिरथंपृष्ठेनैरृतावल
शालिनः॥ ४३॥ वालखिल्याःसहस्राणिषष्टिर्ब्रह्मर्षयोऽमलाः॥ पुरतोऽभिमुखंयान्ति
स्तुवन्तिस्तुतिभिर्विभुम्॥ ४४॥ एवंह्यनादिनिधनोभगवान्हरिरीश्वरः॥ कल्पेकल्पे
स्वमात्मानंव्यूह्यलोकानवत्यजः॥ ४५॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसं
हितायांवैयासिक्यांद्वादशस्कंधेआदित्यव्यूहएकादशोऽध्यायः॥ ११॥ ॥०॥

नैरृताराक्षसाः॥ ४३॥ किंच॥ वालखिल्याइति॥ एतेप्रतिमासंतेएव॥ विभुंसूर्य्यं॥ ४४॥ व्यूह्यविभज्य॥ ४५॥ इतिद्वादशेएकादशोऽध्यायः॥ ११॥

संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानन्तरं द्रष्टव्यम् ॥१२॥ इति तृतीयार्थः ॥१३॥ चतुर्थस्कन्धार्थमाह नवब्रह्मणां
 मरीच्यादीनां समुत्पत्तिः संतानः ॥ पंचमस्कंधार्थमाह ॥ तथा ततः प्रैयव्रतं प्रियव्रतस्य चरितं ॥१४॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेप

संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥१२॥ अवतारो हि देवस्य कपिलस्य महात्मनः ॥
देवहूत्याश्च संवादः कपिलेन च धीमता ॥१३॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥
ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥१४॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः ॥ ना
भेस्ततोऽनुचरितमृषभस्य भरतस्य च ॥ ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनम् ॥
ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥१५॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च सं
ततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥१६॥ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च
दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रल्हादस्य महात्मनः ॥१७॥

तः ॥ ततो द्वीपादीनां ये गिरयो नद्यस्तेषां सुपवर्णनं ॥ पातालनरकादीनां च स्थितिः ॥ अनेनैव नरकनिवर्तकमजामिलो
पाख्यानं गृहीतं ॥१५॥ ततः परीचीनं षष्ठार्थमाह ॥ दक्षजन्मेति ॥१६॥ सप्तमार्थमाह पुत्रयोश्चेति ॥१७॥ ॥ ० ॥ ० ॥

एवंसामान्यतोनिरूप्येदानींद्वादशस्कंधप्रकरणार्थाननुक्रामति ॥ पारीक्षितमुपाख्यानंपरीक्षिज्जन्मादि तत्रस्तावास्यनार
दाख्यानंच ५ ब्रह्मर्षभस्यब्राह्मणोत्तमस्य ॥ इतिप्रथमस्कंधार्थः ॥ उत्क्रांतिरर्चिरादिगतिः ६ प्राधानिकः प्रधानका
र्यविराड्रूपः ॥ अग्रतः आदितः महदादिक्रमेणेत्यर्थः ॥ इति द्वितीयार्थः ७ ॥ महापुरुषस्यसंस्थितिः ॥ प्रलयेतत्रलीय

पारीक्षितमुपाख्यानंनारदाख्यानमेवच ॥ प्रायोपवेशोराजर्षेर्विप्रशापात्परीक्षितः ॥ ५ ॥
शुकस्यब्रह्मर्षभस्यसंवादश्चपरीक्षितः ॥ योगधारणयोत्क्रान्तिःसंवादोनारदाजयोः ॥ ६ ॥
अवतारानुगीतंचसर्गःप्राधानिकोऽग्रतः ॥ विदुरोद्धवसंवादःक्षत्रमैत्रेययोस्ततः ॥ ७ ॥ पु
राणसंहिताप्रश्नोमहापुरुषसंस्थितिः ॥ ततःप्राकृतिकःसर्गःसप्तवैकृतिकाश्चये ॥ ८ ॥
ततोब्रह्माण्डसंभूतिर्वैराजःपुरुषोयतः ॥ कालस्यस्थूलसूक्ष्मस्यगतिःपद्मसमुद्भवः ॥ ९ ॥
भुवउद्धरणांभोधौहिरण्याक्षवधोयथा ॥ ऊर्द्धतिर्यग्अवाक्सर्गोरुद्रसर्गस्तथैवच ॥ १० ॥
अर्द्धनारीनरस्याथयतःस्वायंभुवोमनुः ॥ शतरूपाचयास्त्रीणामाद्याप्रकृतिरुत्तमा ॥ १२ ॥

नस्थानम् ॥ प्राकृतिकः प्राकृतिकभवोगुणक्षोभरूपः वैकृतिकामहदादयः ॥ चकाराद्विकाराश्चये ॥ तयोस्तेषांचसर्गाः ८ ग
तिःस्वरूपम् ९ उद्धरणाउद्धरणम् १० ॥ अर्द्धाभ्यांनारीचनरश्चतस्य ११ ॥

भा॰द्वा॰
॥५१॥

पूतनावाअसुसहितस्यपयस पानम् ॥२७॥ सहभ्रातुःससखस्य ॥२८॥ ॥२९॥ यत्रतः एनाअभिषेकश्चतयोर्द्वन्द्वेकाम

पूतनासुपयःपानंशकटोत्सादनंशिशोः ॥ तृणावर्त्तस्यनिष्पेषस्तथैववकवत्सयोः ॥
धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः ॥ गोपानांचपरित्राणंदावाग्नेःपरिसर्पतः ॥२९॥
दमनंकालियस्याहेर्महाहेर्नन्दमोक्षणम् ॥ व्रतचर्य्यातुकन्यानांयत्रतुष्टोच्युतोव्रतैः
प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनम् ॥ गोवर्द्धनोद्धरणंचशक्रस्यसुरभेरथ ॥ यज्ञा
भिषेकंकृष्णस्यस्त्रीभिःक्रीडाचरात्रिषु ॥ शंखचूडस्यदुर्बुद्धेर्वधोरिष्टस्यकेशिनः ॥३१॥ अक्रू
रागमनंपश्चात्प्रस्थानंरामकृष्णयोः ॥ व्रजस्त्रीणांविलापश्चमथुरालोकनंततः ॥३२॥ ग
जमुष्टिकचाणूरकंसादीनांचयोवधः ॥ मृतस्यानयनंसूनोःपुनःसांदीपनेर्गुरोः ॥३३॥ म
थुरायांनिवसतायदुचक्रस्ययत्प्रियम् ॥ कृतमुद्धवरामाभ्यांयुतेनहरिणाद्विज ॥३४॥
जरासंधसमानीतसैन्यस्यबहुशोवधः ॥ घातनंयवनेंद्रस्यकुशस्थल्यांनिवेशनम् ॥३५॥

॥३०॥३१॥३२॥३३॥३४॥३५॥

अथमार्थमाह॥ मन्वन्तरानुचरितमिति॥ कचित्कस्यचिदनुक्तिर्व्यक्तमोक्तिश्च भक्तिरसानुकूलत्वेनेति द्रष्टव्यम्॥१५॥१६॥

मन्वंतरानुचरितंगजेंद्रस्यविमोक्षणम्॥ मन्वंतरावताराश्चविष्णोर्हयशिरादयः॥१७॥
कौर्म्यंमात्स्यंनारसिंहंवामनंचजगत्पतेः॥ क्षीरोदमथनंतद्वदमृतार्थेदिवौकसाम्॥१८॥
देवासुरमहायुद्धंराजवंशानुकीर्त्तनम्॥ इक्ष्वाकुजन्मतद्वंशःसुद्युम्नस्यमहात्मनः॥१९॥ इलो
पाख्यानमत्रोक्तंतारोपाख्यानमेवच॥ सूर्य्यवंशानुकथनंशशाद्याद्यान्नृगादयः॥२०॥ सौक
न्यंचाथशर्य्यातेःककुत्स्थस्यचधीमतः॥ खट्वांगस्यचमांधातुःसौभरेःसगरस्यच॥२१॥ रा
मस्यकोशलेन्द्रस्यचरितंकल्बिषापहम्॥ निमेरंगपरित्यागोजनकानांचसंभवः॥२२॥ राम
स्यभार्गवेंद्रस्यनिःक्षत्रीकरणंभुवः॥ ऐलस्यसोमवंशस्यययातेर्नहुषस्यच॥२४॥ दौष्यंते
र्भरतस्यापिशंतनोस्तत्सुतस्यच॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशोनुकीर्त्तितः॥ यत्रावतीर्णो
भगवान्कृष्णाख्योजगदीश्वरः॥ वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले॥ तस्यकर्माण्यपाराणि

नवमार्थमाह राजवंशेति॥२२॥२३॥ सोमवंशादिभूतस्यैलस्य चरितं॥२४॥ तत्सुतस्य भीष्मस्य च॥ दशमार्थमाह तस्य कर्माणीति॥२६॥

इति चोक्तमिति ॥ वकारादन्यदपि वः ॥ पुण्याभिरिह यत्पृष्टोस्मि तदुक्तमिति ॥ किमेवं नानार्थरूपघनेन तत्राह ॥ लीलेति ॥ सर्वेशः
तत्तदर्थकीर्त्तनद्वारेणेत्यर्थः ॥ ४४ ॥ तत्कीर्त्तनेनापि किमित्यपेक्षायां तत्फलमाह ॥ द्वाभ्याम् ॥ पतितः कूपादिषु ॥ स्खलि
तः सोपानादिषु ॥ आर्त्तः दुःखितः क्षुत्वा क्षुतं कृत्वा ॥ विवशोपि ॥ ४६ ॥ संकीर्त्यमानः ॥ यद्वा ॥ श्रुतोऽनुभावो यस्य सः ॥ पुं

इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः ॥ लीलावतारकर्माणि कीर्तितानीह सर्व
शः ॥ ४५ ॥ पतितः स्खलितो वार्त्तः क्षुत्वा वा विवशो गृणन् ॥ हरये नम इत्युच्चैर्मुच्यते स
र्वपातकात् ॥ ४६ ॥ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ॥ प्रवि
श्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥ ४७ ॥ मृषा गिरस्ता ह्यसतीरस
त्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयम् ॥

सां चित्तं प्रविश्य पतितः ॥ शेषं दुर्भयं विधुनोति हि ॥ इति ॥ सतामनुभवं प्रमाणयति ॥ अर्को गिरिगुहादि ध्वान्तं न निवर्त्तयतीत्य
रितोऽपि दृष्टान्तान्तरमाह ॥ अतिवातोऽभ्रमिवेति ॥ ४७ ॥ हरिकीर्त्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमि
ति प्रपंचयति ॥ मृषा गिर इति चतुर्भिः ॥ मृषा गिरो मिथ्यावाचः ॥ असतीरसत्यः ॥ असतां कथाया सुताः ॥ यत्र यासु उत्तमश्लो

कस्य यशोनुगीयत इति यत्तदेव सत्यम् ॥

द्विषत शत्रून्प्रमथ्य ॥ ३६ ॥ ३७ ॥ येच संबरादयस्तेषां माहात्म्यं प्रभावः ॥ ३८ ॥ ३९ ॥ एकादशार्थमाह विप्रशापेति ॥ ४० ॥ धर्म्मविनिर्णयो वर्णाश्रमधर्म्मनिश्चयः ॥ ४० ॥ मर्त्यपरित्यागः मनुष्यतस्यान्तर्द्धापनम् ॥ ४१ ॥ द्वादशार्थमाह युगेति ॥ युगलक्ष

आहरणं पारिजातस्य सुधर्म्मायाः सुरालयात् ॥ रुक्मिण्याहरणं युद्धे प्रमथ्य द्विषतो हरेः ॥
हरस्य जृंभणं युद्धे बाणस्य भुजकृन्तनम् ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत्
चैद्यपौंड्रकसाल्वानां दन्तवक्रस्य दुर्मतेः ॥ संबरो द्विविदः पीठो मुरः पंचजनादयः ॥ माहा
त्म्यं च वधस्तेषां वाराणस्याश्च दाहनम् ॥ ३८ ॥ भारावतारणं भूमेर्निमित्तीकृत्य पांडवान्
विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ यत्रात्म
विद्या ह्यखिला प्रोक्ता धर्म्मविनिर्णयः ॥ ४० ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४१ ॥
युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४२ ॥
देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः ॥ शाखाप्रणयनमृषेर्मार्कंडेयस्य सत्कथाः
॥ ४३ ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४४ ॥

णं तदनुरूपा वृत्तिश्चेत्यर्थः ॥ त्रिविधा प्राकृतिको नैमित्तिको नित्यश्चेति ऋषेर्व्यासस्य ॥ ४३ ॥ सूर्यस्य च विन्यास इत्यर्थः ॥ ४४ ॥

किंच वर्णाश्रमाचारादिषु यः परो महान् परिश्रमः ॥ स यशोमुक्त्यां श्रियामेव कीर्त्तौ संपत्तौ वा केवलं न परमपुरुषार्थः
त्वर्थः गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ५१ ॥ ततः किमत आह ॥ अविस्मृतिरिति क्षिणोति
नाशयति ॥ ५२ ॥ अथेदानीं श्रोतॄणां नात्मानं चाभिनन्दन्नाह ॥ यूयमिति द्वाभ्याम् ॥ हे द्विजाग्र्याः ॥ यद्यस्मात् ॥ आत्मनस्त्वत्तः

यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयो
र्गुणानुवादश्रवणादिभिर्हरेः ॥ ५२ ॥ अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि श
मं तनोति च ॥ सत्वस्य शुद्धिं परमां च भक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥ ५३ ॥ यूयं द्वि
जाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणं देवमदेवमीशम
जस्रभावा भजताविवेश्य ॥ ५४ ॥ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात्
प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ ५५ ॥ श्री० ॥ छ ॥ ०॥

करणे श्रीनारायणं आविवेश्य शश्वत् भजत संभा ॥ वनायां लोट् ॥ अतो भूरिभागा बहुपुण्याः ॥ कथंभूतम् ॥ अखिला
त्मभूतं सर्वान्तर्यामिणम् ॥ अत एव देवं सर्वोपास्यम् ॥ अदेवं न देवोऽन्यो यस्य तम् ॥ कुत ईशम् ॥ यद्वा ॥ यस्मादेवंभू
रिभागास्तत आदिसंपन्नाः ॥ ततो नारायणं भजतेति विधिः ॥ ५४ ॥ मेव्य ॥ पाश्रतम् ॥ ५५ ॥

तदेव हि मंगलम् उद्धरति हर्षे॥ भगवद्गुणानामुदयो यस्मात् तत् नवं नवं यथा भवति तथा रुचिरं रुचिप्रदम्॥ महानुत्सवो यस्मात्
॥४९॥ चित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तथा॥ तद्धरेर्यशो न प्रगृणीत न वर्णयेत्॥ तद्वचः॥ ध्वांक्षतीर्थं काकतु
ल्यनराणां रतिस्थानं न तु हंसैर्ज्ञानिभिः सेवितं तत्र हेतुः॥ यत्रेति॥५०॥ स वाग्विसर्गः स एव वाचः प्रयोगः॥ जनताघविप्लवः
जनसमूहाघनाशकः॥ यद्यस्मात्तान्येव अन्यैः कीर्त्यमानानि शृण्वन्ति श्रोतरि सति गायंति नो चेत्स्वयमेव॥ गृणन्ति॥५१॥

तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम्॥ तदेव शोकार्णवशोषणं नृणां
यदुत्तमश्लोकयशोनुगीयते॥४९॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्
हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः॥५०॥ स वाग्विस
र्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनन्तस्य यशोंकिता
नि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः॥५१॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शो
भते ज्ञानमलं निरंजनम्॥ कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म यदप्यनुत्तमम्॥५२॥

इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिरेवादरः कर्तव्य इत्याह॥ नैष्कर्म्यं ब्रह्म तत्प्रकाशकं यज्ज्ञानम्॥ यतो निरंज
नम् उपाधिनिवर्तकम्॥ तदप्यच्युतभक्तिवर्जितं चेत्॥ न शोभते नापरोक्षाय पर्याप्तं भवतीत्यर्थः॥ ईश्वरे न चेदर्पितं तर्हि य
दप्यनुत्तमं सर्वोत्तमं ममैपि कर्म तदपि पुनः॥ कुतः शोभते यतः॥ शश्वत्साधनकाले फलकाले च अभद्रं दुःखात्मकम्॥५२॥

अस्यपुराणस्यैवंप्रभावातिरेकेकारणमाह॥कलिमलानांसंहतिंसमूहंकालयतिविनाशयतीति॥तथाइतरत्रशास्त्रान्त
भा॰ द्वा॰ ॥ रे॥६५॥शास्त्रप्रतिपादितंभगवंतंनमस्करोति॥नमितिद्वाभ्यां॥जगदुदयस्थितिसंयमात्मानोरजआदयःशक्तयोयस्यतं
॥५४॥

कलिमलसंहतिकालनोऽखिलेशोहरिरितरत्रनगीयतेह्यभीक्ष्णं॥इहतुपुनर्भगवा
नशेषमूर्त्तिःपरिपठितोनुपदंकथाप्रसंगैः॥६५॥नमहमजमनन्तमात्मतत्वंजग
दुदयस्थितिसंयमात्मशक्तिम्॥द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्यु
तंनतोऽस्मि॥६६॥उपचितनवशक्तिभिःस्वआत्मन्नुपरचितस्थिरजंगमालयाय
भगवतउपलब्धिमात्रधाम्नेसुरऋषभायनमःसनातनाय॥६७॥०॥०॥

द्युपतिभिर्देवैरपिदुरवसितः।अज्ञातस्तवःस्तोत्रंयस्यतं॥६६॥उपचिताभिरुद्रिक्ताभिर्नवशक्तिभिःप्रकृतिपुरुषम
हदहंकारतन्मात्ररूपाभिः॥स्वआत्मन्येवोपरचितैःस्थिरैर्जंगमंचालयोयस्यतस्मैभगवते॥६७॥०॥छ॥+

एतत्पुराणकीर्त्तनादिफलं प्रपंचयितुमाह एतद्व इत्यष्टभिः ॥ ५६ ॥ यामंक्षणोच्चेत्यर्थः ॥ आत्मानमेवसाक्षात्पुनातिनतुसा

एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥ ५६ ॥
य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव
सः ॥ ५७ ॥ द्वादश्यामेकादश्यां वा शृण्वंतापुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यप
तकी ॥ ५८ ॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते
भयात् ॥ ५९ ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छन्ति कामान्गृणतः शृण्वतो ये
न कीर्तिता ॥ ६० ॥ ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः प
यःकुल्याश्च तत्फलम् ॥ पुराणसंहितामेतामधीत्य प्रयतो द्विजाः ॥ प्रोक्तं भगवता यत्तत्तत्प
दं परमं व्रजेत् ॥ ६१ ॥ विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलाम् ॥ वैश्यो निधिपतित्वं च शूद्रः

नादिवदेहमात्रम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वा अनुविंदत इति ॥ किंच यो
क्षमिति ॥ ६१ ॥ राजन्य उदधिमेखलां पृथ्वीं संधिरार्थः ॥ ६२ ॥

दुर्लक्ष्यत्वमेव प्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशिषं प्रार्थयते ॥ पृष्ठे भ्राम्यत् ॥ अमन्दो मरिष्ठो मन्दरगिरिस्तस्य ग्रा
वाणस्तेषां मग्नाणि तैः कंडूयनात्तेन सुखेन निद्रालोः निद्राशीलस्य ॥ येषां श्वासानिलानां संस्काराः ते षां कलालेशानां
दनुवर्त्तनवशाज्जलनिधेरंभसां यातायातं न विश्राम्यति ॥ ननु समुद्रक्षोभादेव न तत्संस्कारवशात्तत्राह ॥ वेलाक्षोभस्त

पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकंडूयनान्निद्रालोः ॥ कमठाकृतेर्भगवतः श्वासानि
लाः पांतु वः ॥ यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनांभसां ॥ यातायातमतन्द्रितं जलनि
धेर्नाद्यापि विश्राम्यति ॥ २ ॥ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं
पाठादेश्च निबोधत ॥ ३ ॥ ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्वि
शति शैवकम् ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः ॥ मार्कंडेयं नव वान्हं च दशपंच चतुः
शतम् ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च ॥ दशाष्टौ ब्रह्मवैवर्त्तं लैङ्गमेकादशैव तु ॥ ६ ॥

स्याभिधेनभिधेयं ॥ २ ॥ पुराणसंख्यास्तासां संभूतिं समाहारं च ॥ अस्य तु श्रीभागवतस्य वाच्यं विषयः प्रयोजनं च दानं च तस्य
पाठादेश्च माहात्म्यं च निबोधत ॥ ३ ॥ त्रयोविंशत् त्रयोविंशतिः ॥ चतुर्विंशतिः ॥ चतुर्विंशतिसहस्राणि शैवकं शिवपुराणम् ॥ ४ ॥

नान्हेतु अग्निपुराणं दश पंच सहस्राणि चत्वारिंशतानि च ५ ६

श्रीगुरुंनमस्करोति ॥ स्वसुखेनैवनिभृतंपूर्णंचेतोयस्यसः ॥ तेनैवव्युदस्तोऽन्यस्मिन्भावोयस्यतथाभूतोऽपिअजितस्यरु
चिराभिर्लीलाभिः ॥ आकृष्टःसारःस्वसुखगतंस्थैर्यंयस्यसः ॥ तदीपंपरमार्थप्रकाशकम् ॥ श्रीभागवतंयोव्यतनुततं
नतोऽस्मीति ॥६९॥ इतिश्रीद्वादशेद्वादशोऽध्यायः ॥ त्रयोदशेपुराणानांसंख्यामाहयथाक्रमम् ॥ दानंदानस्यमाहात्म्यं

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ॥ व्यतनुत
कृपयायस्तत्त्वदीपंपुराणं ॥ तमखिलवृजिनघ्नंव्याससूनुंनतोऽस्मि ॥६९॥ इतिश्रीमद्भागवते
महापुराणेपारमहंस्यांसंहितायांवैयासिक्यांद्वादशस्कन्धेप्रतिसंक्रमलक्षणेद्वादशोऽ
ध्यायः ॥१२॥ सूतउवाच ॥ यंब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंतिदिव्यैःस्तवैर्वेदैःसांगपदक्रमोप
निषदैर्गायंतियंसामगाः ॥ ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनोयस्यांतंन
विदुःसुरासुरगणादेवायतस्मैनमः ॥१॥

श्रीमद्भागवतस्यच ॥ सर्वपुराणसंख्यादीननुपवर्णयिष्यन् ॥ तत्प्रतिपाद्यंदेवंप्रणमति ॥ यमिति ॥ स्तवैर्वेदैश्चस्तुन्वंतिस्तुव
न्तिउपनिषच्छब्दस्याकारांतत्वंछंदोनुरोधेनध्यानेनावस्थितंनिश्चलंतद्गतंयन्मनस्तेनयस्यांतंनविदुःसुरासुरगणाः

क्षीरोदमथनादौ ॥

१२ तद्रसरसामृततृप्तेनतत्रस्यानिर्वृतस्य १३ १४ पारमहंस्यं परमहंसैःप्राप्यम् नैष्कर्म्यंसर्वकर्मोपरमः अतस्तच्छृण्वन्
दिपरोविमुच्यते १५ श्रीभागवतसंप्रदायप्रवर्त्तकरूपेणभगवद्ध्यानलक्षणंमंगलमाचरति कस्मैब्रह्मणेऽतुलः

राजन्तेतावदन्यानिपुराणानिसतांगणे यावन्नदृश्यतेसाक्षाच्छ्रीमद्भागवतंपरम् १२
सर्ववेदान्तसारंहिश्रीभागवतमिष्यते तद्रसामृततृप्तस्यनान्यत्रस्याद्रतिःक्वचित् १३
निम्नगानांयथागंगादेवानामच्युतोयथा वैष्णवानांयथाशंभुःपुराणानामिदंतथा
श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियंयस्मिन्पारमहंस्यमेकममलंज्ञानंपरं
गीयते यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतंतच्छृण्वन्विपठन्विचारण
परोभक्त्याविमुच्येन्नरः १५ कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरातद्रूपेणचना
रदायमुनयेकृष्णायतद्रूपिणा योगीन्द्रायतदात्मनाथभगवद्राताय कारुण्यतस्तच्छुद्धंवि
मलंविशोकममृतंसत्यंपरंधीमहि १६

असमः अयंश्रीमद्भागवतःपुराकल्पादौ तद्रूपेणब्रह्मरूपेण तद्रूपिणानारदरूपिणा योगीन्द्रायशुकाय तदात्मनाशु
[illegible]णतत्परंसत्यंश्रीनारायणाख्यंधीमहीतिगायत्र्यैवयथोपक्रममुपसंहरन्गायत्र्यारब्धब्रह्मविद्येयमितिदर्श

स्कान्दंशतनाधिकेकाशीतिसहस्रम् ॥ ७ सौपर्णंगरुडपुराणम् एकोनविंशत एकोनविंशतिः ॥ ८ महाभारतंत्वितिहासः रा
मायणंचऋषिप्रोक्तंकाव्यम् अतःपुराणानांसंदेहश्चतुर्लक्षसंख्याकएव इदानींमस्यवाच्यप्रयोजनादीन्सन्दर्शयति

चतुर्विंशतिवाराहमेकाशीतिसहस्रकम् ॥ स्कांदंशतंतथाचैकंवामनंदशकीर्तितम् ॥ ७ ॥ कौ
र्मंसप्तदशाख्यातंमात्स्यंतत्तुचतुर्दश ॥ एकोनविंशत्सौपर्णंब्रह्मांडंद्वादशैवतु ॥ ८ ॥ एवं
पुराणसंदोहश्चतुर्लक्षउदाहृतः ॥ तत्राष्टादशसाहस्रंश्रीभागवतमिष्यते ॥ ९ ॥ इदंभग
वतापूर्वंब्रह्मणेनाभिपंकजे ॥ स्थितायभवभीतायकारुण्यात्संप्रकाशितम् ॥ १० ॥ आ
दिमध्यावसानेषुवैराग्याख्यानसंयुतम् ॥ हरिलीलाकथाव्रातामृतानंदितसत्सुरम्
सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणम् ॥ वस्त्वद्वितीयंतन्निष्ठंकैवल्यैकप्रयोजनम् ॥ ११ ॥
प्रौष्ठपद्यांपौर्णमास्यांहेमसिंहसमन्वितम् ॥ ददातियोभागवतंसयातिपरमांगतिम् ॥ १२ ॥

माह तत्रेत्यादिना ॥ ९ हरिलीलाकथानांव्रातःसमूहः सएवामृतंतेनानंदिताःसंतःसुराश्चयेनतत् ॥ तन्निष्ठंतद्विषयं १०
प्रोष्ठपद्यांभाद्रपद्यां ॥ हेमसिंहसमन्वितंस्वर्णसिंहासनारूढम् ॥ ११ ॥

[illegible] ...स्तेणाच प्रणमति नमस्तस्मा इति द्वाभ्याम् व्याचचक्षे आख्यातवान् ॥ १७ ॥ १८ ॥ भावार्थदीपिकामेतां भग
वद्गतेः ... श्रीपरानंदपाराद्भ भृंगः श्रीधरो करोत् ॥ स्वबालचपलालापैः स्वलीलापरिनर्तितैः प्रीयतां
परमानंदस्वहरिः सद्गुरुः स्वयम् ॥ श्रीपरमानंदसंप्रीत्यै गुह्यं भागवतं मया ॥ तन्मते नेदमाख्यातं ननु मन्मतिवैभवा

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ १७ ॥
योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमु
चत् ॥ १८ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वा
दशस्कन्धे पुराणसंख्यावर्णनो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ❋ ॥ १३ ॥ श्री
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दृश्यते १ ॥

न ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधसंबंधिन्यां भावार्थदीपिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥ समाप्तोयं द्वादशस्कन्धः ॥ १२ ॥ सम्वत् १९ ५७ ॥ मिती आषाढ शुक्ल कृष्ण ६ चंद्रवासरे ॥ लि
खितं श्रीवृन्दावनं ॥ माधवप्रसादब्राह्मणः ॥ श्रीकृष्णचंद्राय श्रुकरूपाय नमो नमः ॥ श्रीरस्तु कल्याणमस्तु